स्तेषां जायते उत्पद्यते तथा पाण्डुपत्रता
पर्णानां पाण्डुत्वं प्रवालानामंकुराणामह
द्धिः शाखानां शोषो वीरसता रसस्रुतिव
स्रुतिः स्रावः एतैश्चिह्नैर्लक्षणैर्ज्ञेयः इति
अथैतेषां चिकित्सितमाह ॥ चिकित्सित
मेषेतेषां शास्त्रेणादौ विशोधनं विडंगघृत
सेकाज्ञात्तेचयेत्क्षीरवारिणा ॥ अथानन्त
रमेतेषां वृक्षाणां चिकित्सितं भवति आदौ
प्रथमे शस्त्रेणावच्छादिविशोधनं कार्यं यदि
वर्णाल्लिन सवयवं न छुरिकया विकर्तयेत
विडंगः हृतमाज्यं पंकः कर्दमः एतैरेकी
कृतैर्वृक्षान् यत्नाल्लिप्सा कुर्यात ततः क्षीर
वारिणा क्षीरयुक्तेन जलेन सेचयेत् एवं
कृते नीरुजा भवति ॥ तथा च काश्यपः ॥
शाखाविटपपर्णेषु छायाया विहता श्चये
येपि पर्णापलैर्हीना रुक्ताः पर्णाश्च पाण्डुरैः
शीतोत्मृष्ठवातार्के मेलैर्वामिश्चतेरपि ॥

शाखिनो न भवेद्रोगो दिपानो लेखनेन
च चिकित्सा तेषु कर्तव्यायेन भूयः पुनर्न
वाः शोधयेत्प्रथमं शस्त्रैः प्रलेपयाद्येत्ततः
कर्दमेन विडंगैश्च घृतमिश्रं श्रलेपयेत्
क्षीरतोयेन सेकः स्याद्रोहणं सर्वशाखिना
मिति ॥ अथ फलानां चिकित्सितमाह
फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः
शृतैस्तुहृतशीतैः कथितैदेव पश्चाक्षीरे
पयः सीरेकर्त्तायेन पयसा फलानां पुष्पा
णां वाभिवृद्धये ॥ अथ हृद्यं प्रयोगमा
ह ॥ अविकाजलकस्य कचूर्णस्याढकं ति
लाढके सक्तुप्रस्थो जलद्रोणो गोमांसतु
लया सह ॥ अविकाजलेसप्तरात्रोषितै
रेतैः सेकः कार्यो वनस्पतेः वल्लीगुल्मलतानां
च फलपुष्पाय सर्वदा ॥ अविःअमिडोमे
षजातिः अजश्छागः आविकाजयोः शकृत्
तीव्रलचूर्णस्य द्वे आढके आविकरणस्या
ढकमजशकृच्चूर्णस्याढके आढके चतः
षष्टिः पलानि तिलानामाढके सक्तुप्रस्थः
षोडशपलानि जलस्य द्रोणः पलशतद्वयं
षट्पंचाशदधिकं एतत्सर्वं गोमांसतु
ला सह तुला पलशते [illegible] चियेवक्री
ललेविधात्माबलः [illegible] तेषुद्वी
द्वपालतार्धं सुवर्णमथ षोडश पलले

उ॰वा॰
टी॰
४२८

428

श्वतमिल्लसर्वौनिष्कउच्यते वनफलो
पऊडवःप्रस्थःस्यात्स्रुतछये श्राठकस्य
वतछ्रुस्याद्रोणस्तचतवाठकः माणि
कातचतद्रोणः खारीस्यातस्रुतछये त
लापलप्राते द्वेयःभारास्याद्दिशाततुला
पृथक्दश्रेषुसंख्येवचादेष्वदिगुणाभवे
तइति एवंतन्मध्यगोमांसस्यगोयिशात
स्यतलादेयात्पलशतमित्यर्थः एतेस्स
र्वैर्विकोक्षैत्तेस्समदाचौघितेस्समाहमषि
तैर्वनस्पतेहदस्यवल्लीतोलतानोफला
नोपुष्पाणांवाभिवृद्धयेहद्यर्थेसर्वदास
र्वकालमेकःकार्यः एतस्माणामेकस्य
वृक्षस्यानेनानुमानेणबहूनांकार्यमिति
तथाचकाश्यपः अजाविकानांद्वौप्रस्थौ
प्राहस्रुणस्यकारयेत तिलानामाढकं
दद्यात्सक्तूनांप्रस्थमेवच गोमांसवतमे
कोस्याद्धेमार्थेसलिलस्यच समाहारमापि
तैरेतैस्तकेदद्याहनस्पतेः सर्वेषांफलपु
ष्पयोर्षांवृद्धिकरंइति ॥ अधुना
बीजानोवापनविधानमाह ॥ वासवा
णिदशाद्रधभावितंबीजमाज्ययुतहस्त
योजितं गोमयेनवहुशोविहतितंक्रोड
मार्गपिशितैस्तथूपितम ॥ मांसस्क
रवसासमन्वितंरोपितंचपरिकर्मिताव

नौ दीरसंयुतजलावसेचितंजायतेकु
सुममेवतत ॥ यस्यकस्यचिद्वृक्षस्यबी
जं[illegible]शावासराणिदशदिनानिदुग्धभावितं
दीघेणाभिक्तंकार्यं कीदृशमाज्ययुतहस्त
योजितं आज्ययुतेनघृताभ्यक्तेनकरेण
कौभनेपृथक्कार्यं एवंप्रत्यहंकर्मका
र्य यावद्दशादिनानि ततोगोमयेनगो
शकृतावहुशोबहुत्वाराविहतितंमर्दि
तं क्रोडस्सकरःमृगोहरिणःक्रोडश्चेदैक्रो
ड मृगस्यदेमार्गं क्रोडमार्गपिशितैर्मांसै
धूपितं भागडान्तःस्थधूपयेत ततोमांसे
नामिषेणसूकरमयावराहमज्जयासम
न्वितंसमायुक्तं परिकर्मितायामवनौप्र
मौरोपितं परिकर्मितानिलवापनेन त
तःदीरसंयुतेनजलेनोदकेनावसेचितं
वमेनहीजमेवेहाते कुसुमसंयुक्तंपुष्पसं
युतमेवजायतेउत्पद्यते ॥ अधुनाति
न्तिडीविधानमाह ॥ तिन्तिडीत्यपिकरो
तिवल्लरीव्रीहिमाषतिलचूर्णसक्तुभिः
पूतिमांससहितैश्चसेचिता धूपिताचस
ततंहरिद्रया ॥ अपिप्राहःसम्भावनायां
तिन्तिडीत्यपिवल्लरीकरोति अभिनवांकु
रान्संजयते यतस्त्वाम्रतिकठिनाकारैः
व्रीहिमाषतिलचूर्णसक्तुभिः व्रीहयोः

ऊँबा॰
तटी॰
५२८

पूगालिवृक्षौः माषचूर्णैस्तिलचूर्णसक्तु।
मिश्रकीटशैः प्रतिमासमहितैः सिञ्चनमो
मयुते पतैश्च सवितां सिक्तो मूलनेसर्व।
कालेहरिद्वायापिधूपिते पतैर्लभवति
तिलिडिवीजब्रीहिचूर्णमाषचूर्णतिल।
चूर्णसक्तुभिर्वेकीकृतैः प्रतिमासमहितैः
सिक्तैः क्रमाद्धरिद्रया धूपयेत् वल्लीका।
रोति अपिशाहादन्यबीजस्य वल्लीकर।
णकस्सन्देहइति ॥ अधुना कपित्थबीज
रोपणविधानमाह ॥ कपित्थवल्लीकर
णायमूलान्यास्फोटधात्रीवधराशिका
नां पलाशानीवेतससर्ववल्लीप्रणामा।
तिमुक्तैस्सहितमष्टमूली ॥ दीवेमूतेवा
प्यनयासप्तीनेनालाशानेस्याप्यकपि
त्थबीजं दिने दिने शोषनमर्कपादैर्मासे
विधिःक्लोचनतेनाधिरोप्यम् ॥ हस्ताय
तेनद्विगुणनाभीरेखाना वटेस्रोतजला
वपूर्णे पृष्ठप्रदर्थमधुसर्पिषातेप्रलो
पयेत्स्समवितेन ॥ चूर्णीकृतैर्मांष
तिलैर्यवैश्च प्रपूरयेन्मृत्तिकया लवैः
मत्स्यामिषाभस्स हितोवहन्याया वज्रेन
तेसमुयापातेनत ॥ नमेवबीजवल्ली
लायोमत्स्याम्भसोमांसजलेश्च सिक्तम्
वल्लीभवत्याशुशुभप्रवालाविस्तापनी

नप्रउमयात्ततोति ॥ कपित्थवल्लीकरणौ।
येति कपित्थबीजस्य वल्लीकरणाय वल्लीज
ननार्थेमूलान्येतानि केषामास्फोटधा।
त्रीवधराशिकानां आस्फोटधात्रीवा तारीश्रा
मलकीवधःस्तनःवाशिका ग्रमिडाणवा
नुर्णाचनार्थेमूलानितथावेतनसोहं।
तःवेतसवृत्तवल्लीव्रततिसमूलापला।
शीपर्णायुक्ता एवमेवसर्ववल्लीप्रणामाय
स्निडाकेचित्रिहदिक्तन्ति अतिमुक्तःस्य
न्दनकःएषांमूलैःसहिताअष्टमूलीभव
ति अष्टानांमूलानांसमाहारोष्टमूली
दीवेहनेश्रुति अनयाष्टमूल्यासहदीवे
हतेवथितेततःसप्तीतहतेतन्मध्येकपि
त्थबीजेतालाशानेस्याप्यतालाहस्तशाहः
पतावन्तंकालेस्थाप्य ततोरहीयात
अनन्तरमर्कपादैः सर्यरश्मिभिः शोषते
कार्यं एवंदिनेदिनेयावन्मासंतावत्प्रतिदिना
ति तावदेवविधिः ततोनन्तरमधिरोप्य
रोपणीयं हस्तायतमिति अवटंगर्ते
हस्तायतं हस्तप्रमाणमायामं तस्मिन्नतः
हस्तहस्तेन द्विगुणगम्भीरे हस्तद्वितय
गम्भीरेतण्णाभतंताला नास्त्रोतेन क
थितेनजलेन दीतोदकेनावपूर्णितेकमा
ततस्तेशोषयेत् ततःपुष्पकसाग्निनाप्रद

उ॰वा॰
ट॰टी॰
४३०

430

हेत पछेदयेच्च मधुमाक्षिकेन सर्पिषा
हृतेन च भस्मसमन्वितेन भस्मयुक्तेन प्र
लेपयेत् लिम्पेत् चूर्णीकृतैर्विति ततो
माषतिलयवैश्चूर्णीकृतैः संचूर्णितैः एव
येत्तमवटेस्मजिक यान्तरंध्यवयमर्थः मृदे
गुलकनुछमात्रे प्रपयित्वा ततो माषादिभि
प्रपयेत् ततस्तेमत्स्यामिषाम्भः साहितेव
हन्यात् मत्स्यामिषेणतत्स्यमांसेन वा
ह्नै यदम्भोजलेनेन हितेन दवटेहन्यात्
नःस्तोदयेत् यावत्तद्वटेयनत्वेकाठिन्य
सम्पायानतेप्रामे नममिति ततस्तव
लवेगुलानामाधमहृदवीजसमेवापिते
मत्स्यायुक्तेन जलेन मांसजलैर्मांसयुक्तैर्व
दकास्तिक्तैसेचिते आफ्रादिप्रमेव पुष्टभप्र
वालाशोभनपल्लवावलीभवति सम्पद्य
ते कीरपुष्पीविस्मापनी विस्मयजननी मेउ
पमाधावेमाहरतीतिआह्लादयति अथा
न्येषांचोपायमाह ॥ पूतमोंकोठसम्भ
तफलकल्केन भाविते पतनैलेन वाबी
जेश्लेष्मातकफलेन वा पिते करकोपि
प्रेश्लदितत्वणजन्मके फलभावान्विताः
पूगाख्याभवतीति किमद्भुते ॥ अंकोठेह
दःतन्लेभनफलकल्केन तन्मूलस्य यः
कल्कोनैव भावो विजलारूपेन यस्य

कस्य विहृदस्य बीजे पूतप्रः पूतवाभा
वितस्मिन् पतनैलेन वा अंकोटफल
तैलेन पूतपुष्पा भाविता प्रदेवबीजे श्लेष्म
तकहृदफलेन वा पूतपुष्पाभाविते त
स्य कल्केन तैलेन वा तस्य वा पिते कर्को
मिश्रमृदिकरका अपूतानियानखेनोमि
श्रावयामनस्या वापितमभेतबीजे त
त्वणजन्मके तस्मिन्नेव त्वणेमहूर्ते तम
न्तास्मिन्नेव जायते पूगाबालतापलभावा
विना फलान्येव जायते आनताविनता
वा भवतीति किमद्भुते किमाश्चर्यं फला
न्येव भावातेनान्विता अवष्टमेव भव
तीत्यर्थः ॥ अथ श्लेष्मातकरोपणमा
ह ॥ श्लेष्मातकस्य बीजानि निष्फली
कृत्य भावयेत्सा नः अंकोलविजलाभि
च्छायायां सप्तकृत्वेवम् माहिषगोमय
पिष्टान्यस्य करीषवतानि निष्फलीकृ
त्य कात्रिमतसमपास ततो कोलफला
तो प्रावि जलाः पिच्छलाश्राप लाभिः
अंकोलविजलाभिश्छायायां भवेत् एव
मनेन प्रकारेण सप्तकृत्वः सप्तवारान्
भावयेत् अंकोलविजलाद्भिर्भावयि
त्वा कायायां शोषयेत् सप्तवारान्यवत्
ततस्तानि बीजानि निक्षिप्य माहिष ।

जोधा·
वाटी·
४२१

गोमयेन प्रक्षालितानि शिल्पानि निर्ले
पा ततोऽस्य महिषस्य करीषेण गोमयेना
पूरितानि बीजानि निक्षिप्य संस्थाप्य
त तत्र तावत्स्थाप्यानि भाण्डानि वप
तानि यावत्करकजलेन पूर्णानि ।
वतिकरकाजलेनाप्लावितानि तानीषे
तया पुष्पाणि यथा पुष्पस्थाने कुसुमानि ।
वापितानि विरूढानि वसन्तफलकराणि
भवन्ति एकेनैवाङ्कफलानीत्यर्थः
अथ वृन्दारोपणेन तथान्याह ध्रुवमृ
दुमूलविशाखागुरुभं श्रवणस्तथाश्वि
नी हस्त उक्तानि दिव्यदृग्भिः पादपसं
रोपणे भानि ॥ ध्रुवाण्युत्तरारोहिणी चेति
मृदूनि अनुराधाचित्रामृगशिरोरेव
त्यश्चेति मृदूनि मूले विशाखा गुरुभं
तिष्यं श्रवणं तथा अश्विनीनक्षत्रं ह
स्तं एतानि नक्षत्राणि पादपानां वृक्षा
णां रोपणे वपनकर्मणि दिव्यदृष्टि ।
दिव्या सूक्ष्मार्थदर्शिनी दृष्टिर्येषां दिव्य
दृग्भिर्मुनयो गर्गादयस्तैः कृत्वा निकथि
तानि के विख्यातानि प्रशस्तानीति
पठन्ति ॥ इति मेहिनाविवृतौ वृक्षा
युर्वेदो नामाध्याय एकपञ्चाशः ॥
ॐ नमः सूर्याय ॥ अथ प्रासादलक्षणं

व्याख्यायते तत्रादावेव प्रयोजनप्रदर्श
नार्थमाह ॥ कृत्वा प्रभूतं सलिलमारा
मान्विनिवेश्य च देवतायतनं कुर्याद्यशो
धर्माभिवृद्धये ॥ प्रभूतं पर्याप्तं सलिलं
जलं कृत्वा तत्रारामान्नन्दनवाटिकान्वि
निवेश्य यशोधर्माभिवृद्धये यशः
कीर्तिर्धर्मस्तयोरभिवृद्ध्यर्थं देवतायतनं कु
र्यात् निदध्यात् अत्रैव प्रयोजनार्थमाह ॥ २
इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता
देवानामालयः कार्यो द्वयमप्यत्र दृश्यते
इष्टं यज्ञादिकं पूर्तं वापीकूपतडागादिकं
तथा चोक्तं इष्टं यज्ञेषु यद्दानं ततोऽन्यत्पूर्त
मिष्यते इष्टाभिः पशुबन्धैश्चातुर्मास्यैर्य
जेद्द्विजः अग्निष्टोमादिभिर्यज्ञैर्यो यजेत स
इष्टवान् वापीकूपतडागादिदेवतायत
नानि च अन्नप्रदामार्यैः पूर्तमित्यभिधीयते
इष्टापूर्तेन ये लोकाः पुण्यस्थानानि लभ्यन्ते
प्राप्यन्ते तान् विभूषता भवितुमिच्छता प्रा
प्तुमिच्छतेत्यर्थः देवानां सुराणामाल
यः कार्यः स्वं देवानां कर्तव्यमित्यर्थः
यतो यद्देवालये द्वयमपि दृश्यते इष्टापू
र्तं च यत्फलं तद्दृश्यते प्राप्यत इत्यर्थः
तथा च कश्यपः इष्टापूर्तादिभिर्यज्ञैर्याव
लभन्ति मानवाः अग्निष्टोमादियज्ञभि

गोवा
टी
४३२

432

हृयत्प्रकीर्तितं वापीकूपतडागादिषु
तेमायतनानीव सर्वास्थितिसदाकुर्या
त्तदा तत्र तत्संनिहितं देवानामालयका
योहयमप्यत्र सम्भवतीति कीदृशेषु स्थाने
षु सत्वरा स्वल्पइत्याह ॥ सलिलोद्यानयु
क्तेषु कृतेषु कृतकेषु च स्थानेषु तेषु सानि
ध्यमत्रागच्छन्तिदेवताः ॥ सलिलयुक्ते
षु जलसंयुतेषु उद्यानयुक्तेषूपवनसहि
तेषु च स्थानेषु कृतेषु श्रष्टनकेषु स्वयं
निष्पन्नेषु पत्तनेषु स्थानेषु देवतास्सानि
ध्यं सान्निहित्यमुपगच्छन्त्यायान्ति ॥
श्रमेषु कीदृशेष्वित्याह ॥ स्वच्छनालि
नीछन्ननिर्मलवारिष्विषु हेलांमादि
मकल्हारवीथीविमलवारिषु हेमकार
ण्डवक्रौञ्चचक्रवाकविराजिषु पर्यन्त
विपुलच्छायाविश्रान्तजलवारिषु प
वविधेषु नरस्नित्यं सर्वकालं देवतादे
वविशेषा रमन्तिक्रीडन्ति कीदृशीषु न
लिनीछन्ननिर्मलवारिविराजिषु नलिनी
पद्मिनी संसेवितकूजत्तेन पक्षिन्या न प
चेना निर्मलानि तात्तनाव विषमयासूर्यं
कतायेषु हंसः पक्षिविशेषलक्ष्मा मोर्व
दौहंसालाम्यामादिमोर्हवेप्रवितोयो
मौकल्हारपुष्पविशेषस्साहितोत्पलल

स्यातेषणामयथावीथीमार्गस्तत्रयाहिम
लेनिर्मलेवारिजलेयेषु हंसः कारण्डवः
क्रौञ्चः चक्रवाकः एते सर्वेपक्षि
विशेषाः तेषां यच्छायायास्तामयच्छाया
सविश्रान्ताजलवारिणो जलप्रवाहि
नोयेषु सरस्सुतेषु नित्यं देवतारमन्ते
श्रन्यकीदृशीष्वित्याह ॥ क्रौञ्चकाञ्ची
कलापाश्चकलहंसकलस्वनाः नद्य
स्तोयांशुकायत्रशफरीकृतमेखलाः ।
पुलिनाभ्युन्नतोरस्या हंसहासाश्च निम्न
गाः फुल्लनीरुहमोन्नताःसेवन्ते मश्रोणि
मण्डलाः ॥ यत्र यस्मिन्स्थाने एवं वि
धा नद्यस्सरितस्तत्र नित्यं देवतारमन्ते
कीदृश्यः क्रौञ्चः पक्षिविशेषस्तएव म
शब्दमानाकाञ्चीकलापारशनाविर्लया
यासां कलहंसाराजहंसास्तेषां यः का
लेमधुरस्वरः सएवस्वनः शब्दः सम्भाष
णं यासां तोयं जलं तदेवांशुकं सम्भारं या
सां शफर्यः मत्स्यमत्स्यस्ता एव कृता मे
खलायाभिः मेखलायावस्त्रस्योपरि व
ध्यते नीवीति लोके प्रसिद्धा तथावनी
विनाग्रेण नार्यं जघनस्थलस्यवासे इ
तिपल्लती रेतियत्र हृष्टेर्निम्नगा नद्यः
तत्र नित्यं देवतारमन्ते फुल्लाः पुष्पिताः

तीरेषूपान्तेषुयेद्रुमाःफुल्लास्तएवोत्तंसाः
कर्णपूराणिमुण्डमालावायासां संग
मोद्वयोर्नद्योर्मेलकस्तएवश्रोणिमण्ड
लंजघनस्थलंयासां पुलिनेषुतीरेषुये
अभ्युन्नताउच्चाःप्रदेशास्तएवोरस्याउर
स्थितमुन्नतंयासां हंसाःसितविशेषाः
ताएवशुभ्राहासोहसनंयासां तास्त
थाभूतास्तासुदेवतारमन्तइति ॥ अन्य
त्रापिस्थानेषुदेवतारमन्तइत्याह
वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु
रमन्तेदेवतानित्यंपुरेषूद्यानवत्सु ॥
वनोपान्तेषुवनोपकण्ठेषु उपान्तशब्दः
प्रत्येकमभिसम्बध्यते नदीषुसमीपे शैलेषु
पर्वतेषुनिर्झरोपान्तभूमिषु निर्झरा
प्रपातपानीयेषुतदुपान्तनदीप्रस्र
तीनांसमीपासन्नभूमिषुनियतेवर
तिस्रवन्तीतिनिर्झरः तेषुनित्यंसर्वकाले
देवतारमन्तेपुरेषुनगरेषु उद्यानवत्सु
येषूद्यानानिउपवनानिविद्यन्ते तेषु
नित्यंरमन्तइति ॥ तथाचकाश्यपः
हरितोज्ज्वलतोयाश्चवाप्याःपद्मादिभिर्वृ
ताः वनोपवनमालिन्योनित्यमुत्फु
ल्लितद्रुमाः हंसकारण्डवाकीर्णाःकोकि
लालापनादिताः सद्भक्तजनसम्पन्न

द्रिःशोभितविभियुताः तत्रैवदेवारतियान्ति
सान्निध्यानित्यमेवस्थिताः ॥ अधुनाप्रतिष्ठा
कारणेभूमिगुणानाह ॥ भूमयोब्राह्म
णादीनांयाःप्रोक्तावास्तुकर्मणि ताए
वैतेषांस्वस्थानेदेवतायतनेष्वपि ॥ ब्राह्म
णादीनां ब्राह्मणक्षत्रियवैश्यशूद्राणां
याभूमयोवास्तुकर्मणिप्रोक्ताःकथिताः
तद्यथा सितरक्तपीतकृष्णाविप्रादीनांप्र
शस्ते भूमिर्गन्धश्चभवति यस्याघृतद
धिरान्नमद्यसमः क्रमशःकषायबहु
ताःदूर्वाकाशहताक्रमेणमहीअनवर्णे
हृदिकरी मधुरकषायाम्लकटुकाचैषां
विप्रादीनांतापवभूमयोदेवतागृहेष्वपि
प्रशस्तेष्यन्तइति ॥ अधुनादेवताग
हेवास्तुपुरुषपदाणोद्धारप्रविभागेनाह
चतुःषष्टिपदंकार्यंदेवतायतनेसदा ॥ द्वा
रंचमध्यमंतस्मिन्समदिक्स्थंप्रशस्यते ॥
सदासर्वस्मिन्कालेदेवतायतनेसुरगृहे
चतुःषष्टिपदंकार्यं । अष्टाष्टकमथैवेतिए
वमेवप्रदर्शितं तस्मिन्देवतायतनेनम
ध्यमंद्वारंमध्यवर्तिनंसमदिक्स्थंसमायां
दिशियथातिष्ठति तथाप्रशस्यतेइष्यते
अथप्रसादानांविधानमाह ॥ योविस्तरो
भवेत्तस्यद्विगुणातत्समुन्नतिः उच्छ्रायात्

गौवा॰
वाटी॰
५३८

स्तृतीयेणांशेन तत्स्यात्कटिःस्तनः विस्तार
यं भवेद्गर्भो भित्तयोन्यास्तस्मन्ततः गर्भपा
देन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥ उच्छ्रा
यात्पादविस्तीर्णं पाणालान्त उडुम्बरः वि
स्तारपादप्रतिमेवाङ्कं स्यात्पाणालयोस्तनम्
त्रिपञ्चसप्तनवभिःपाणालाभिस्तत्प्रशस्यते
अधःपाणालावत्तांगे प्रतीहारौ निवेशयेत
पूर्णघटं गल्पविहगश्रीवृक्षस्वस्तिकैर्घटैः
मिथुनैःपत्रवल्लीभिःप्रथमेश्चापशोभयेत् ।
द्वारमानाष्टभागोना प्रतिमा स्यात्सपिण्डिका
द्वौ भागौ प्रतिमा तत्र तृतीयेणांशपिण्डिका
यो विस्तार इति तस्य देवगृहस्य यो विस्तारो
विष्कम्भो भवेत्तस्मात् द्विगुणविस्ताराद्द्विगु
णमुन्नति उच्छ्राये भवति यथा मेरुप्रासाद
स्याष्टाविंशद्धस्ता विस्तारा विस्ताराद्द्विगुणाः
सप्तनतिः वत्सप्राविस्तारः उच्छ्रायाय।
स्तृतीयेंशास्तृतीयभागेनेन तल्यं तस्या
देवगृहस्य कटिस्तनो ज्ञेया यथा मेरोस्तृते
ष्टाविंहस्ता उच्छ्राय तस्यास्त्रिभाग एकविंश
तिहस्ताः अष्टावङ्गुलानि अनेन प्रमाणेन
कटिर्भवति सोपानैः परियन्तो देवगृह
स्यप्राग्भस्तत्कटिरुच्यते विस्तारार्धमि
ति देवगृहस्यो विस्तारः उक्तः तदर्द्धं गर्भो
भवति यथा मेरोर्हस्ता द्वात्रिंश विस्तारः

तदर्थे षोडशत्रनेन प्रमाणेन मेरोर्गर्भः अ
न्यास्तस्मन्ततः तस्मादुदितभित्तये भवन्ति
हस्तमात्रे प्रमाणाय मवोत्स्रदित्यानाहितेर्थं
पयित्वा शेषे हस्तत्रये भित्तिपट्ट ब्रह्मयात ग
र्भस्य यःपादस्तत्पर्यायेण मानेन द्वारविवि
स्तीर्णं द्वारं भवति यथा मेरोर्गर्भः षोडशा
हस्ताः तस्य चतुर्भागश्चत्वारो हस्ताः एषद्वा
रस्य विस्तारः विस्ताराद् द्विगुणमुच्छ्रितं कार्यं
एवमष्टौ हस्ता मेरुद्वारस्योच्छ्रायादिति द्वार
स्य य उच्छ्राय तस्य यः पादश्चतुर्भागस्तेन माने
न विस्तीर्णं पाणालाद्वारिका कार्या यथा मे
रुद्वारस्योच्छ्रायोष्टौ हस्ताः तस्य चतुर्भागो द्वौ
हस्तौ एष पाणालाया विस्तारः तत्तु उडम्बरः
तद्वन्नैव प्रकारेणोडुम्बरः कार्यः पाणालायो
रूपरियत्काष्ठं दीयते तच्चाधस्तादुडुम्बरा
विति केचित्पठन्ति विस्तारपादप्रमिति
पाणालाया यो विस्तारस्तस्य यः पादश्चतुर्भाग
स्तत्प्रमितेन तल्यं पाणालायोर्बाहुल्यं घनत्वं स्त
नमके यथा मेरुद्वार पाणालाविस्तारो द्वौ ह
स्तौ विस्तारपादो द्वादशाङ्गुलानि एतत् घन
त्वं त्रिपञ्चसप्तनवभिरिति तद्वारे त्रिभिः
पञ्चभिः सप्तभिर्नवभिश्च पाणालाभिर्द्वारि
काभिःप्रशस्यते इष्यते पाणालाविस्तारस्त्रि
भिर्येदि न पूर्यन्ते तदा पञ्चभिरपि न पूर्यन्ते

तदासमभिनेहर्यतेनदानवमिहरणीय
इति॥ शाखयोर्योध्वललेवत्तभागः तुर्यो
शाखाविस्तरतोहारौनान्दिदण्डदिकोनि
वेशयेत्कारयेत् । शेषभागत्रयेमंगल्यवि
हंगैमंगल्यवल्लिःपत्रिभिर्हंसकारण्डवच
क्रवाकजीवजीवकप्रभृतिभिःश्रीहदैः
स्वस्तिकैश्रीरुक्षविशेषैः स्वस्तिकस्यवास्तुनः
सदृशोर्ध्वटैः। कलशैःमिथुनैःपत्रवल्लीभिः
पत्रलताभिः प्रथमेगात्रेशोपशोभयेच्छा
खामुत्पादयेत् द्वारमानस्यभागेनेति द्वार
स्यहीनेप्रमाणमङ्गुष्ठस्यस्योष्टभागो
योद्धोशकेनद्वारेप्रमाणहीनाप्रतिमाची
सपिण्डिकार्धेनसहिताकार्या । तत्रद्वौभागौ
प्रतिमाकार्या तृतीयेशक्तितृतीयेभागा पि
ण्डिकार्धेदिकाकार्येति यथामेरुप्रसाद
स्यद्वारोङ्गुष्ठाशेहस्तः अस्याष्टभागएको
हस्तः अनेनद्वारमानेसमहस्तापततस्यपि
ण्डिकायाःप्रतिमायस्यप्रमाणं अस्यान्द्रा
वाहृयेचत्वारोहस्ताःषोडशांगुलानिच
एततृतीयेभागेहस्तद्वयमष्टांगुला।
नियततिपिण्डिकायाःप्रमाणमिति एवं
सर्वप्रासादेषुज्ञेयं ॥ तथाचकश्यपः शुभ
तुलारप्रासादाकर्तव्याःशुभलक्षणाः
नानाधानाभिनीवाश्रसमदिक्स्वसवि

न्मा

ताः चतुःषष्ठिकोष्टकानामभ्यंतरवि
न्यसेत् द्वारंचमध्यमेअष्टसमदिक्स्थप्रश
स्यते विस्तारद्विगुणोत्सेधःकटिवेशेतत्तो
यके विस्तारार्धेनरुभोभित्तयोस्यात्तथा
त्ते गर्भाश्चतुर्थभागेचद्वारेतद्विगुणो।
च्छ्रितं द्वारेशाखाचतुर्भागेविस्ताराःशा
खयोस्मृतः उदुम्बरस्तथैवोक्तःप्रावामा
नोद्भवितस्ततः चतुर्थपादमानेनशाखे
येअप्रकीर्तिते एकशाखेत्रिशाखेवाप
ञ्चसप्तनवापिवा द्वारकालत्रशाखतोद
र्भियैप्रकाशकाः शाखाचतुर्थभागेन।
प्रतीहारौतुकारयेत् प्रथमेविहंगैश्चैव
जीवजीवजलोद्भवैः श्रीहंसस्वस्तिकैःपमे
हंसैश्चैवमनोरमैः पत्रान्तेजलाशयैर्ग्रा
हैर्वनायिकादिभिः देवसपिण्डिकस्या
प्यद्वारसोपानादिनप्रभे द्वौभागौप्रति
माकार्यातृतीयेचैवपिण्डिका स्वपनेशे
षिभागेचवामपार्श्वेविधीयते निर्माल्यं
चनिवेद्यचबलिपूजासमार्जने ॥ अथ
नाप्रसादानोनामान्याह ॥ मेरुमन्दर
कैलासविमानच्छन्दनन्दनाः समुद्गप
द्मगरुडनन्दिवर्धनकुञ्जराः गुहराजोवृ
षोहंसःसर्वतोभद्रकोघटः सिंहवृत्तच
तुष्कोणषोडशाष्टाश्रयस्तथा इत्येते विंशति

ऊँवा॰
राटी॰
४३८

प्रोक्ताः प्रासादास्तंत्रयामया यथोक्तान्ता
क्रमेणैव लक्षणानि वदाम्यतः ॥ मेर्वाद्या
यथाक्रमेण विंशतिः संज्ञाः प्रासादानां
मेरुः मन्दरः कैलासः विमानच्छन्दः न
न्दनः समुद्गः पद्मः गरुडः नन्दिवर्धनः
कुंजरः गुहराजः वृषः हंसः सर्वतोभद्र
कः घटः सिंहः वृत्तः चतुष्कोणः षोडशाश्रि
अष्टाश्रि इत्येवं प्रकारा एते विंशतिः प्रासा
दामयामंत्रयानाप्रोक्ताः कथिताः अतो
स्मादनन्तरं यथोक्तानुक्रमेण यथैवानु
क्रमेणोक्ताः कथिताः तेनैवानुक्रमेण ल
क्षणानि वदामि कथयामि इति तत्रादा
वेव मेरुप्रासादस्य लक्षणमाह ॥ तत्र
उश्रिर्मेरुर्द्वादशभौमो विचित्रकुहरान्वि
द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः
तत्र तस्मिन्प्रासादलक्षणे मेरुनामप्रा
सादः षडश्रिः षडश्रयः कोणा यस्य प्रा
दशभौमाः उपर्युपरि द्वादशभूमिका भ
वन्ति इत्यर्थः विचित्रकुहरः विचित्राना
नाकाराः कुहराः अभ्यन्तरगवाक्षा यत्र
वन्ति चतुर्भिर्द्वारैर्युक्ता वनस्पृदिव्
तस्मिन्द्वाराणि भवन्ति द्वात्रिंशद्धस्तवि
स्तीर्णो विष्कम्भ अर्थादेव चतुःषष्टिह
स्तोच्छ्रयः तथा च कश्यपः द्वात्रिंश

द्धस्तविस्तीर्णो चतुर्द्वारैः षडश्रिके भूमिका
स्तत्र कर्तव्या विचित्रकुहरान्विताः द्वाद
शोपर्युपरि यावत्तेनाप्रेस्तसमान्विताः प्रा
सादो मेरुः संज्ञः स्यान्निर्दिष्टो विश्वकर्मणा
अथ मन्दरकैलासयोर्लक्षणमाह ॥ वि
शद्धस्तायामो दशभौमे मन्दरः शिखरयु
क्तः कैलासोपि शिखरवर्तनष्टाविंशोष्टभौ
मश्च ॥ तत्र षडश्रित्वेन सर्वत्रानुवर्तते
नन्दनलक्षणं यावत् मेरुसंज्ञः प्रासाद
स्त्रिंशद्धस्तविस्तीर्णो विष्कम्भात् षष्टिहस्त
सोच्छ्रयः षडश्रिश्च दशभूमाभूमिकाभिर्युतः
शिखरैरपि समायुतः तथा च कश्यपः
मन्दरः शिखरैर्युक्तः षडश्रिर्दशभूमिकः
त्रिंशद्धस्तविस्तीर्णः प्रासादोयं द्वितीय
कः कैलासोपीति अपिशब्दः तस्यावता
यो कैलासोपि षडश्रिः शिखरास्त्रिखरैर्वै
युक्तः अष्टाविंशद्धस्तविस्तीर्णो विष्कम्भा
त् षट्पञ्चाशद्धस्तोच्छ्रयः अष्टभौमः अ
ष्टाभिर्भूमिकाभिर्युक्तः ॥ तथा च कश्यपः
अष्टभौमश्च कैलासो हस्ताष्टविंशतिस्ततः
षडश्रिः शिखरोपेतः प्रासादस्तु तृतीयकः ॥
अथ विमाननन्दनयोर्लक्षणमाह ॥ जा
लगवाक्षकयुक्तो विमानसंज्ञस्त्रिसमका
यामः नन्दन इति षड्भौमो द्वात्रिंशत्षोड।

जेवा·
ताटी·
४१२

पाण्डयुतः ॥ विमानस्तुद्देन्नःषडश्रिः
जालगवाक्षयुतः जालकोपलक्षितैः
गवाक्षैरेकस्य भूमिकाभिर्युक्तः त्रिसप्तका
यामो विष्कम्भेनैकविंशतिहस्तः आया
मोदैर्घ्यं अर्थादेवद्वाविंशतिहस्तास्त
स्योच्छ्रये अष्टभूमिकस्य तथाचकश्यपः
गवाक्षजालसंयुक्तो विमानस्त्वेकविंशतिः
षडश्रिरष्टभौमश्च प्रासादस्याश्चतर्थकः
नन्दन इति नन्दनसंज्ञःषडश्रिःषड्भौम
श्च षड्भूमिकाभिर्युक्तो द्वात्रिंशद्धस्ताविस्तारे
ष्कम्भान विस्तीर्णः वतःषड्हस्ताम्
मेच्छ्रये षोडशभिरण्डैर्युक्तः अण्डःप्रासा
दस्योपरि भवति तथाचकश्यपः नन्द
नस्तु षडश्रिःस्याद्द्वात्रिंशद्धस्तविस्तृतः ष
ड्भौमः षोडशाण्डस्तु प्रासादः पञ्चमो मतः
अथ वृत्तपद्मयोर्लक्षणमाह वृत्तस्समु
द्गनामा पद्मः पद्माकृतिश्च कः अष्टौ शृङ्गे
नैकेन भवेदेकैव भूमिकास्य ॥ समु
द्गनामा वृत्तः परिवर्तुलः समुद्गकाकारः
पद्मः पद्माकृतिः कमलाकारोष्टाभिर्दलै
र्युक्तः एतौ द्वावपि प्रासादौ अष्टौ यामा
अष्टहस्ता विस्तीर्णौ विष्कम्भान षोडश
हस्तास्तयोरोच्छ्रये शृङ्गेन नैकेन भवेत्स्या
त् एकेन शृङ्गेणैकेनाण्डेनोपलक्षितौ ।

द्वावप्येतौ तस्यैव प्रासादद्वयस्यैकैव भू
मिका भवति तथाचकश्यपः वर्तुलस्तु
समुद्गः स्यात् पद्मः पद्माकृतिस्तथा हस्ता
ष्टकं तु विस्तीर्णौ भूमिका शृङ्गभूषिता ॥
अथ गरुडनन्दिवर्धनयोर्लक्षणमाह
गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्क
विस्तीर्णः कार्यस्तु सप्तभौमो विभूषितोऽण्डै
स्त्रिंशता ॥ गरुडसंज्ञो गरुडाकृतिर्गरु
डाकारः पक्षपुच्छयुक्तः नन्दीति च षट्
चतुःसप्तश्चये नन्दिवर्धनसंज्ञश्च गरुडाका
रएव किन्तु पक्षपुच्छयुतः नन्दीति वहि
तः षट्चतुष्काश्चतुर्विंशद्धस्ताविस्तीर्णः अष्ट
चत्वारिंशद्धस्तास्तस्योच्छ्रये तथा सप्तभिर्भू
मिकाभिर्युक्तः अण्डानां विंशत्या भूषितो
लक्षितो गरुडो नन्दिवर्धनश्च तथाचक
श्यपः गरुडो गरुडाकारः पक्षपुच्छविभू
षितः नन्दी नन्दाकृतिर्ज्ञेयः पक्षादिरहि
तः पुनः करणैः षट्चतुष्काच्च विस्तीर्णौ स
प्तभूमिकौ द्वादशाभिर्युक्ताण्डैर्भूषितौ का
र्येतौ ॥ अथ कुञ्जरगुहराजयोर्लक्ष
णमाह ॥ कुञ्जर इति गजपृष्ठो षोडशह
स्तःसमन्ततोमूलात गुहराजःषोडशक
स्त्रिचन्द्रशाला भवेद्वलभी ॥ कुञ्जरसंज्ञो
गजपृष्ठः हस्तिपृष्ठाकारः षोडशहस्ताः

ठं·वा·
टी·
४३८
438


समन्ततोमलात् मलात्षोडशहस्तस्य।
मन्ततश्चतुर्दिक्षुषोडशहस्तविष्कम्भः।
अन्येषांपादःषोडशहस्तास्तावितोमला
त् एवंद्वात्रिंशद्धस्तास्तस्योच्चं उच्छ्रितो
गजाकारएकभूगुहराजोगुहाकारःषोड
शाकःषोडशैकहस्तविस्तीर्णो द्वात्रिंशद्ध
स्तास्तस्योच्चं एकभूमिकश्चश्चनयोर्द्धं
योरपिवलभीकूटैस्त्रिभिश्चशालाभवेत्
स्यात् तिसृभिश्चन्द्रशालिकाभियुक्तोऽत्यर्थः
तथाचकश्यपः ऊर्जरोगजपृष्ठोदोहस्ता
ष्टोडशविस्तृतः गुहराजोगुहाकारोवि
ष्कम्भोषोडशस्मृतः चन्द्रशालावलभी
त्रयेकार्यामृपलक्षणा दशैकादश
श्रोतोप्रासादौद्वौप्रकीर्तितौ ॥ अथुनावृ
षहंसघटानांलक्षणमाह ॥ वृषएक
भूमिशृंगोद्वादशहस्ताःसमन्ततोवृत्तः
हंसोहंसाकारोघटोघटंसःकलशरूपः
वृषसंज्ञएकभूमिशृंगः एकयाभूमिक
यैकेनशृंगेनाशिखरेणयुक्तः द्वादशहस्त
विस्तीर्णाविष्कम्भात् चतुर्विंशतिहस्तात्
स्योच्चं समन्ततस्सर्वासुदिक्षुवृत्तःपरि
वर्तुलः एकभूमिकश्च हंसोहंसाकारोहे
मसदृशः पञ्चपत्तपक्षयुक्तः द्वादशह
स्तविस्तीर्णः चतुर्विंशतिहस्तास्तस्योच्चम्

एकभूमिकश्चघटसंज्ञःकलशरूपःकल
शाकारः अष्टहस्तविस्तीर्णोविष्कम्भात्
षोडशहस्तास्तस्योच्चम् एकभूमिकश्चस
र्वेषांवैकशृंगः तथाचकश्यपः वृषेद्वाद
शहस्तस्समवृत्तैकभूमिकः शृंगेनैकेन
संयुक्तःपत्तपुच्छाग्रलेपतः घटःकलश
रूपस्तविस्तीर्णोष्टकरःस्मृतः ॥ अथुना
सर्वतोभद्रस्यलक्षणमाह ॥ द्वारैश्चतस्र
भिर्वहुशिखरोभवतिसर्वतोभद्रः वहुरु
चिरचन्द्रशालाषड्विंशःपञ्चभौमश्च ॥ स
र्वतोभद्रसंज्ञःप्रासादश्चतुर्भिर्द्वारैर्युक्तः च
तसृष्वपिदिक्षुतस्मिन्द्वाराणिभवन्तीत्यर्थः
वहुशिखरोभवति वहूनिप्रभूतानितस्मि
ञ्छिखराणिभवन्ति वहुरुचिरचन्द्रशाला
वहीभिःप्रभूताभिःरुचिराभिःसशोभना
भिश्चन्द्रशालाभिर्युक्तः षड्विंशत्यङ्गुलाति
हस्ताविस्तीर्णोविष्कम्भात् अर्थादेवद्वाप
ञ्चाशद्धस्तास्तस्योच्चं पञ्चभौमः पञ्चभिः
भूमिकाभिर्युक्तःचतुरस्रः तथाचकश्यपः
शिखरैर्वहुभिर्युक्तःचतुर्द्वारविभूषितः रु
चिरैश्चन्द्रशालैश्चवहुभिःपरिवारितः चतुर
स्रःपञ्चभौमद्वात्रिंशद्धस्तविस्तृतः सर्वतो
भद्रउक्तःप्रासादेदशपञ्चमः ॥ अथसिं
हकर्णचतुष्कोणषोडशदशश्रोणीलक्षण

गेवा:
दादी:
५६४

माह ॥ सिंहस्सिंहाक्रान्तो द्वादशकोणो
ष्टहस्तविस्तीर्णः वन्नाकेजनरूपायञ्चोड
शहस्तवत्रस्रः ॥ सिंहसंज्ञसिंहाक्रा
न्तः सिंहालंकृतो द्वादशकोणो द्वादशाश्रिः
अष्टहस्तविस्तीर्णः सर्वपञ्चहस्तवत्तकोण
षोडशाद्दशाश्रिसंज्ञस्तदशाष्टनयः हस्तःप
विवर्तलः वत्तकोणः षोडशाश्रिः षोडश
कोणः अष्टाश्रिः वृत्तकोणः एतेऽष्टजनरू
पास्सान्धकारा इत्यर्थः बाह्यप्रकाशपक्षेषु
वप्रविधानि अथमर्थः देवप्रासादस्यमानि
हृष्टस्तत्त्वपि दिक्षु भित्तीः कृत्वा प्रासाद
स्य पश्चिमभागे द्वारं कार्यं तास्मभित्तयश्चोर्ध्व
भागे तथा छेदनीया यथा प्रासादोऽन्धकार
वर्जितो न दृष्टव्याः तत्र बहिर्द्वारस्य विष्ण
प्रासादस्य वामभागे नागन्धपुरतः प्रासाद
स्य द्वारं कार्यं तत्र मणिमयी प्रतिमा तत्का
र्या तत्र प्रकाशमुत्पद्यते एते सर्वे एवैकभू
मिकाः कार्याः एकाण्डश्चतुरस्रः पुनः भू
म्याण्डयुतः कार्यः पञ्चभिर्भूमिसंयुतः ॥
तथा वकस्पपः सिंहः सिंहैः समाक्रान्तः को
णो द्वादशाभिर्युतः विष्कम्भादष्टहस्तः स्यादे
कारस्यवभूमिका हस्तैष्टाहतिः कार्याः
सेन्दुस्तत्पालपाये साधकाबालसर्वेते
भूमिकैकासमाहृतः एकाण्डभूषिताः सर्वे

पञ्चभिश्चतस्रकः ॥ अथमयविश्वकर्म
णोर्मतेन भूमिकाप्रमाणमाह ॥ भूमिका
ङ्गुलमानेन मयस्याष्टान्नवपाते सार्धहस्त
त्रयेचैवकथितेविश्वकर्मणा ॥ मयस्यम
तेनाष्टान्नवेपातमङ्गुलानोभूमिकामानेप्र
तमष्टानवेस्मृते अङ्गुलानामिति विश्वक
र्मणा सार्धहस्तत्रयेभूमिकानां कथितम
ते चतुरशीत्यङ्गुलानीत्यर्थः ॥ तथा च
विश्वकर्मणा चतुर्भिरधिकाशीतिरङ्गुला
नां तु भूमिकेति ॥ अत्रापि परमतेनैकवा
क्यतो दर्शयितुमाह ॥ प्राकृत्यपतयश्चा
त्रमेत्रमेकं विपश्चितः कपोतपालिसंयुक्ता
न्त्यागच्छन्ति तत्पतां ॥ अत्रास्मिन्नर्थे वि
पश्चितः पण्डिताः स्थपतयो वर्धकिनः प्रति
ष्ठातेत्रज्ञा मयविश्वकर्मणोरेकमतं प्राङ्ग
भेन्नवन्तः विश्वकर्मणो मतेन यावन्तः
प्रमाणहीना भूमयः ताः कपोतपालिसं
युक्ता मयमतेन तुल्यतां गच्छन्ति समतां
यान्ति कपोतपालिग्रहणेन वहितानिर्ग
तानि सिंहमस्तकानि काष्ठानुच्यन्ते तथा चो
क्तं कपोतपालिध्रुवते विटंकेच वदन्त्यतः
तथा वक्तेत्यन्तरे पठ्यते कपोतपालिबहि
र्गमानं चतुरशीतिकं भूमिकानां महतया
प्रातमष्टान्नवेस्मृते अङ्गुलानां मतसाम्येन



सेवा°
वटी°
५५०
550

भिकाख्यप्रकीर्तितम् एवं तत्स्यत्तमभवतीति
अथोपसंहारार्थमाह ॥ प्रासादलक्षणमि
दं कथितं समासाद्गर्गेण यद्विरचितं तदि
हास्ति सर्वं मन्वादिभिर्विरचितानि यानि पृ
थूनि तत्संस्पर्शमिति मयात्र कृतोऽधि
कारः ॥ इदं मया प्रासादलक्षणं समासात (सा)
संक्षेपात्कथितमुक्तं यच्च प्रासादलक्षणं ग
र्गेण मुनिना विरचितं कृतं तत्सर्वमिह वा
प्रोथमिहास्मिन्नास्ति विद्यते यानि च पृथू
नि विस्तीर्णानि मन्वादिभिर्मनुवसिष्ठप्रभृ
नग्नजिद्भिर्विरचितानि कृतानि प्रासादलक्ष
णानि तानि प्रतिमायाहारमानाहभावो
नेत्यादिसलक्षणलक्षणया संस्पर्शनयाधि
कारः कृतः प्रासादलक्षणं कृतमित्यर्थः
अथवा तत्संस्पर्शानि सर्वाणि लक्षणा
नि प्रतिसंस्पर्शान्यवास्पर्शान्मयात्राधिकारः
कृत इति ॥ इति भट्टोत्पलविरचितायां सं
हिताविवृतौ प्रासादलक्षणं नामाध्यायो
द्वापञ्चाशः ॥ ॐ नमः सूर्याय ॥ अथ
वज्रलेपलक्षणं व्याख्यायते तत्रादावेव
प्रथमं वज्रलेपमाह ॥ आमं तिन्दुकमामं
कपित्थकं पुष्पमपि च शाल्मल्याः बीजानि
सल्लकीनां धन्वनवल्कं वचा चेति एतैस्स
लिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्च

अवतार्योऽस्य च कल्क इष्टैरेतैः समनुयोज्यः
श्रीवासकरसगुग्गुलभल्लातककुन्दुरूक
सर्जरसैः अतसीबिल्वैश्च युतः कल्कोऽयं व
ज्रलेपाख्यः ॥ तिन्दुकं तिन्दुकफलं आम
मपक्वं कपित्थकं कपित्थकफलमाममेव
शाल्मल्याः शाल्मलिवृक्षस्य च पुष्पं सल्ल
कीनां सल्लकीवृक्षाणां बीजं धन्वनवल्कः
धन्वनवृक्षस्य वल्कलं वचा चेत्येवं प्र
कारः एतैः इष्टैः सह सलिलद्रोणः क्वाथ
यितव्यः द्रोणः पलशतद्वयं षट्पञ्चा
शदधिकं यावदष्टभागावशेषो भवति
द्वात्रिंशत्पलान्यवशेषाण्यन्त इत्यर्थः ततो
ऽष्टभागावशेषः अवतार्योऽवतारणीयोऽग्ने
रित्यर्थः अस्य चाष्टभागशेषस्य एतैर्द्रव्यैः
वक्ष्यमाणैः कल्कं चूर्णं समनुयोज्यो दात।
व्यः तच्चूर्णं तेन युक्तः कार्य इत्यर्थः कैरित्याह
श्रीवासकेति श्रीवासवासकः प्रसिद्धो वृ।
क्षनिर्यासः रसो बोलः गुग्गुलः प्रसिद्धः भल्ला
तकं प्रसिद्धमेव कुन्दुरूको देवदारुवृक्षनि
र्यासः सर्जरसः सर्जवृक्षनिर्यास एव तैल
प्या अतसी प्रसिद्धा बिल्वं श्रीफलं एतैश्च
युतस्समवेतः अयं कल्को वज्रलेपाख्यः
वज्रलेप इत्याख्या नाम यस्य अथास्य गुणा
नाह ॥ प्रासादहर्म्यवलभीलिङ्गप्रति

ज्यो॰
टी॰
३४१


मासुकुड्यकूपेषु सन्तप्तो दातव्यो वर्षसह
स्रायुतस्थायी ॥ प्रासादो देवप्रासादः
हर्म्यं गृहं वलभी वातायनं लिङ्गं शिव
लिङ्गं प्रतिमार्चा एतासु तथा कुड्येषु
दकाधारेषु सन्तप्तोऽग्नितप्तो दातव्यो देयः
वर्षसहस्रायुतस्थायी भवति वर्षाणाम
हस्रायुतेन वर्षकोटिरित्यर्थः ॥ अन्य
द्वज्रलेपमाह ॥ लाक्षाकुन्दुरुगुग्गुलुगृह
धूमकपित्थबिल्वमध्यानि नागफलानि
म्बतिन्दुकमदनफलमधूकमञ्जिष्ठाः स
र्जरसमामलकानि चेति कल्कः कृतो द्विती
योऽयं वज्राख्यः प्रथमगुणोऽयमपि तेष्वेव
कार्येषु ॥ लाक्षा प्रसिद्धा तरुनिर्यासः
कुन्दुरुर्देवदारुतरुनिर्यासः गुग्गुलप्रसि
द्धः बिल्वमध्ये एतानि तथा नागफलं नि
म्बः प्रसिद्धः तिन्दुकस्तिन्दुकफलं केचि
न्नागफलापलतिन्दुके मदनेफलेति पठ
न्ति नागफलापले तिन्दुकफले मधूकफ
लं मञ्जिष्ठा प्रसिद्धा सर्जरसः सर्जवृक्ष
निर्यासः रसो बोलः आमलकं धात्रीफलं
एतानि चेत्येवंप्रकारो द्वितीयः कल्कः कृतो
वज्राख्यो वज्रलेपसंज्ञकः प्रथमगुणो पूर्वोक्त
गुणैः एतैः सलिलद्रोणः क्वाथयित्वाष्ट
भागशेषश्चेति तदा सन्तप्तो दातव्य इति

अयमपि वज्रलेपस्तेष्वेव प्रासादेषु कार्यः।
प्रासादादिषु स च वर्षसहस्रायुतस्थायी
भवति ॥ अन्यदप्याह ॥ गोमहिषाज
विषाणैः खररोमा महिषचर्मगव्यैश्च
निम्बकपित्थरसैः सह वज्रतलो नामक
ल्कोऽन्यः ॥ गोमहिषौ प्रसिद्धौ अजः
छागः एतेषां सर्वेषां विषाणाः प्रसिद्धः
एषां सर्वेषां विषाणानि शृङ्गाणि तैस्तथा
खररोमाणि गर्दभलोमभिः महिषचर्म
गव्यं च सह निम्बः कपित्थफलं रसो बोलः
एतैः सहान्यः कल्कः प्राग्वत्कृतः एतैः स
लिलद्रोणः क्वाथितव्योऽष्टभागशेषश्चेत्या
दि वज्रतलो नाम अयमपि प्रथमगुणैः
तेष्वेव कार्येष्विति ॥ अन्यदप्याह ॥ अ
ष्टौ सीसकभागाः कांसस्य द्वौ तु रीतिकाभा
गः मया कथितो योगो यं विज्ञेयो वज्र
संघातः ॥ सीसस्याष्टौ भागाः अंशाः कां
सस्य द्वौ भागौ रीतिकाभाग एकः अयं
योगो वज्रसंघातो नाम मया कथितो म
याऽत्र विज्ञेयो ज्ञातव्यः अयमपि प्रथम
गुणो लेपेष्वेव कार्येष्विति अस्य प्रमाणानु
मानेन तावद्विकल्पतो ज्ञाता अन्ये सम
मात्राकार्याः इत्यागमः तथा च यमः
सेवत्स्याष्टौ सीसभागाः कांसस्य द्वौ तथा

उँवा·
तटी·
५८२
442

वैकः दीतिकायास्तमस्तमोवज्ञाख्यःपवि
कीर्तितइति ॥ इतिश्रीभट्टोत्पलविरचि
तायांवज्रलेपलक्षणंनामाध्यायस्त्रिप
ञ्चाशः ॥ ॐनमस्सूर्याय ॥ अथप्र
तिमालक्षणंव्याख्यायते तत्रादौविवप
रमाणुप्रमाणार्थमाह ॥ जालान्तरगे
भानौयदणुतरंदर्शनेरजोयाति तद्विद्या
त्परमाणुप्रथमंतद्धिप्रमाणानाम ॥
भानावादित्येजालान्तरगेगवाक्षस्यजा
लमध्यवर्तिनियद्रश्मिपतितेणुतरंसूक्ष्म
तरंदर्शनंयातिदृष्टिप्रथममायाति त
त्परमाणुंनामप्रमाणंविद्याज्जानीयात
हियस्मात प्रमाणानांसर्वेषांतत्प्रथम
मायेप्रमाणंपरमाणुसंज्ञम अथपर
माणोर्ज्ञायते अंगुलप्रमाणज्ञानमाह
परमाणुरजोवालाग्रलिक्षायूकायवांगु
लंचेति अष्टगुणानियथोत्तरंमेंगुलमे
कंभवतिसंख्या ॥ एतानिपरमाणवं
दीनियथोत्तरमष्टगुणान्यंगुलमेकंभ
वति तद्यथा अष्टभिःपरमाणुभिरजो
भवति अष्टभीरजोभिर्वालाग्रं अष्टभि
र्वालाग्रैर्लिक्षा अष्टभीर्लिक्षाभिर्यूका अ
ष्टभिर्यूकाभिर्यवः अष्टभिर्यवैरंगुलम
एवंयथोत्तरंपरमाण्वादीन्यष्टगुणान्यंगु

लाष्टगुणान्यंगुलेसंख्याभवति तथाच
जालान्तरगतेभानौयत्सूक्ष्मंदृश्यतेरजः
तस्यत्रिंशत्प्रमाणानोपरमाणुंप्रवदन्ते
तस्मादजःकचाग्रंचलिक्षायूकायवांगुलं
क्रमादष्टगुणंज्ञेयंजिनसंख्यांगुलैःकरः
अथसमस्तायाःप्रतिष्ठायाःप्रमाणमाह
देवागारद्वारस्याष्टांशोहीनस्ययस्तृती
यः तत्पिण्डिकाप्रमाणंप्रतिमातद्द्विगुण
परिमाणा ॥ देवागारेदेवगृहेयद्द्वारंत
स्यउच्छ्रायस्तस्ययोष्टांशोष्टभागस्तेनहीं
नस्ययस्तृतीयभागः तत्पिण्डिकाप्रमा
णंपीठिकापरिमाणं तद्द्विगुणपरिमा
णाप्रतिमार्चाभवति ॥ अथप्रतिमाया
अवयवप्रमाणमाह ॥ स्वैरंगुलप्रमाणै
र्द्वादशविस्तीर्णमायतंचमुखं नग्नजिते
चतुर्दशदैर्घ्येणद्राविडंकथितम ॥ यस्मा
त्काष्ठात्पाषाणादिकाद्वाप्रतिमाक्रियते
तदैर्घ्यंपीठप्रमाणेनविवर्जितंद्वादशवि
भक्तंकृत्वा तत्रैकोभागोनवधाकार्यः
सोंगुलसंज्ञोभवति यस्मादष्टाधिकम
ंगुलशतंप्रतिमाप्रमाणंवदन्ति स्वैरंगु
लप्रमाणैरिति प्रतिमायाःस्वकीयैरं
गुलप्रमाणैर्मुखंवदनंद्वादशांगुलानिवि
स्तीर्णंमुखंकथितंदैर्घ्येणचतुर्दशांगुलानि



एतद्द्रविडद्रविडदेशमाने तथावन्तुप्रजित
विस्तीर्णं द्वादशम्मुखं देर्घेण च वक्तदेशांग
लानि तथाकार्यं तन्मानेद्रविडे स्वन्तमि ।
ति ॥ अन्यदप्याह नासाललाटचिबुक
ग्रीवाश्चतुरंगुला तथाकर्णौ द्वावङ्गुलीव
हनुनी चिबुकं वद्व्यङ्गुले विस्तृतम् ॥ नासा
चतुरंगुला देर्घेण कार्यं ललाटं मुखशृङ्गं
चतुरंगुलादीर्घा तथाकर्णौ ग्रीवा च चतुरे
गुलौ दीर्घमेव चिबुकं चतुरंगुलमेव चिबु
कग्रहणेन नासायाः चतुरंगुले भागेऽव्य
ते ग्रीवा चतुरंगुलादीर्घा तथाकर्णौ श्रो
त्रावचतुरंगुलादीर्घौ हनुनी द्वे द्व्यंगुलीव
विस्तृते मुखबन्धौ हनुनी चिबुकं च द्व्यंगुले
विस्तृते विस्तीर्णं कार्यं चिबुकशब्देनात्र
मुखस्याधोभाग उच्यते ॥ अन्यदप्याह ॥
अष्टाङ्गुले ललाटं विस्तारात्व्यङ्गुले परे शङ्खौ ॥
चतुरंगुलौ तु शङ्खौ कर्णौ तद्व्यंगुलौ पृथुलौ
ललाटं विस्तारादष्टांगुलं तस्मात्परे भागे
द्व्यंगुलौ द्व्यंगुलप्रमाणौ शङ्खौ का
र्यौ ललाटान्ततः कार्यौ इत्यर्थः कर्णौ च
चतुरंगुलौ पृथुलौ विस्तीर्णौ कार्यौ ॥ अ
न्यदप्याह ॥ कर्णोपान्तः कार्योर्ध पञ्चमे
षु समेन सूत्रेण कर्णः स्रोतः सकसारके
चनेत्र प्रबन्धसमम् ॥ कर्णस्योपान्तः

समीपः अर्धपञ्चमसेगुले यस्मिन्भागेमा
र्धानि चत्वार्यंगुलानि नेत्रान्ताद्वभ्यन्तस्मिन
सूत्रसमेन सूत्रेण मध्येन कर्णोपान्तः का।
र्यः कर्णाग्रमित्यर्थः कर्णस्रोतः कर्णच्छिद्रं
सकसारकेव कर्णस्रोतः समीपो नेत्रे शोभा
नः तमेत्र प्रबन्धते नेत्रप्रबन्धशब्देन प्रक
षिकोच्यते तत्समेन तुल्यं कार्यमंगुलप्र
माणमित्यर्थः ॥ अन्यदप्याह ॥ चतुरे।
गुले वसिष्ठः कथयति नेत्रान्तकर्णयोर्वि
वे अन्तरंगुलप्रमाणस्तस्यार्धे नाम वोऽहस्त
वसिष्ठमुनि नेत्रे पुकर्णयोर्विवरमन्तरं च
तुरंगुलं कथयति ॥ तथाचवसिष्ठः ॥
कर्णनेत्रान्तयोश्चान्तद्वियाच्चतुरंगुलम् ।
अर्धवोहप्रमाणेन तस्यार्धेनाङ्गरेण तु ॥
तस्यार्धे नार्धवोहस्यार्धेनार्धांगुलविस्तीर्णः
कार्य इत्यर्थः ॥ अन्यदप्याह ॥ अर्धांगुले
तेषो श्वापकेच चतुरंगुलयुते कार्यं विपुले
तत्सार्धमेगुलमथ्यामेद्व्यंगुलेव्यासमम् ॥ तो
श्चा अर्धांगुले विस्तीर्णकार्या वर्क्षेच चतुरंगु
ले विस्तीर्णकार्यं तथासार्धमेगुले विपुले
विस्तीर्णकार्यं यश्चयच्चवामे मविकासिते
व्यामेविकासिते पुनरपि सिंहादेद्व्यंगुले
विस्तीर्णकार्यम् ॥ अन्यदप्याह ॥ घेग
ततलोनासापुटे च नासापुटाग्रतोऽर्ध्या।

ऊँवा॰
तटी
पृ४५

स्यार्धांगुलमङ्गुष्ठायमंगुलमनवं वार्धो:
नासापुटोर्द्धांगुलतस्यार्द्धकुलप्रमाणोका
यौ तथा नासापुटाग्रतोऽर्द्धकुलतुल्यैव
ह्रेयाज्ज्ञातव्या नासायार्द्धकुलमङ्गुष्ठाया।
ऽोष्ठेस्याद्भवेत अधोग्लत्रयोर्द्वयोर्मध्ये
वतरकुलप्रमाणे भवत्येतदनुक्तमपित्ज्ञा
यते ॥ अन्यदप्याह ॥ अर्द्धकुलमितोत्त
कोष्ठो हेतेचेतत्त्रिभागिकाताल हन्वाव।
पञ्चो प्रोनेत्रविकासांगुले भवति ॥ अत
केप्रोनपुटोर्द्धांगुलमितेर्द्धांगुलप्रमाणः
हेमंगुलेनयनेनेत्रे तत्त्रिभागिकाताल
अंगुलद्वयत्रिभागिकातालनेत्रमध्ये
त्तोभावाः हन्वावामध्यवर्तिनीऊमारी अं
गुलद्वयपञ्चोषः नेत्रविकासेनयनवै।
पुल्यमंगुलंभवति ॥ अन्यदप्याह ॥ प
र्यन्तान्त्यर्यन्तोदप्रोभ्रूवोर्धांगुलेभ्रुवोरेखा
भ्रूमध्ये द्व्यंगुलके भृदैर्घ्येणांगुलचतुष्कम।
भ्रूवोः पर्यन्तात्पर्यन्तो दशांगुलानि प्रमाणे
वामभ्रूपर्यन्तात् दक्षिणभ्रूपर्यन्तं यावद्दशां
गुलानि भ्रूवोर्लेखा भ्रूलेखा अर्धांगुलवि
स्तीर्णा भ्रूमध्ये भ्रूवोर्ये द्व्यंगुलके द्व्यंगुल
प्रमाणविस्तीर्णकार्यम भृदैर्घ्येणातेनोग
लवतुष्ककार्यमिति ॥ अथान्यत ॥ का
र्यान्तके प्रोरेखा भ्रूवदसमांगुलार्धविस्तीर्णा

नेत्रान्तकरवीरकमुपत्न्यमेदंगुलप्रमितम ॥
केशरेखाललाटोपरिभ्रूवदसमाग्रूवस्त्रका
र्यातत्स्या दशांगुलप्रमाणावेत्यर्थः अंगु।
लार्धविस्तीर्णा नेत्रान्तवदत्पर्यन्तकरवी
रकमसवकेतिप्रसिद्धम ॥ अथान्यत ॥ द्वा
त्रिंशान्परिणाहाश्चतुर्दशायमतोंगुलानिशि
रः द्वादशाविश्वकर्मणोहृष्पन्तेविंशतिरहृष्पा ॥
रिणोद्वात्रिंशादंगुलानिशिरः परिणाहात्का
र्यं चतुर्दशांगुलान्यायामतोविष्कम्भात्
विश्वकर्मणापुनर्द्वादशांगुलानिदृश्यन्ते।
विंशतिरहृष्पाः पश्चिमभागस्यांगुलानो
कायागतानिभवन्ति ॥ अथान्यत ॥ आ
स्यंसाकेशान्तिचये षोडशोदैर्घ्येणानग्रामि।
त्योक्ते ग्रीवादशाविस्तीर्णापरिणाहाद्विंश
तिसैका ॥ तत्रानित्याक्तोप्रतिमालक्ष
णे आस्यमुखंसकेशान्तिचये केशरेखया
सहितं षोडशांगुलानिमुखदीर्घं चतुर्दशां
गुलानिकेशरेखाद्व्यंगुलेएवं षोडशान
त्यानग्राजित द्व्यंगुलाकेशरेखिवमुखस्या
ष्टाउशांगुलमिति ग्रीवापिरोधदशां
गुलानिविस्तीर्णकार्या विंशतिसैकावि
शतिः परिणाहम ॥ अन्यदप्याह ॥ क
ण्ठाद्वादशहृदयंहृदयानाभीचतन्प्रमा
णेन द्वादशांगुलान्येतनाभीमध्यान्मे।

जैवा॰
टी॰
४४५

ष्ठान्तं वलितमध्यंवयावत् तत्तुल्येनतस्मै
वान्तंकथितंद्वादशांगुलानीत्यर्थः अथान्य
त ॥ ऊरूवांगुलमानेअन्तर्येताविंशतिल
या जंघेजानुकपिअन्तरांगुलेवपादौव
तन्तुल्यो ॥ ऊरूदीर्घावत्कुलमानेअन्तर्युता
विंशतिअन्तविंशत्यंगुलानि तथाजंघेव
त्विंशतिरेवदीर्घाजानुकपिस्थवत्तवत्तु।
लेप्रमाणेकार्यंयवलोकेवकुलिकेतिप्रा
स्तिद्वियोदोवततुल्यानतस्मैगुल्फादारभ्या
धोभागअन्तरंगुलःकार्यः ॥ अन्यदप्याह
द्वादशादीर्घौवटरपृथुतयावपादौत्रिकाय।
तांगुष्ठौ पञ्चांगुलपरिणाहौप्रदेशिनीअं
गुलदीर्घौ ॥ पादौवरणोपायस्याग्रारभ्या
गुष्ठमूलेयावद्वादशांगुलानिदीर्घौकार्यौ
पृथुतयाविस्तारेणषडंगुलानि अङ्गुष्ठौ
त्रिकायततौ त्र्यंगुलानिदीर्घौकार्यौ
अन्यदप्याह ॥ अष्टोपाष्टाङ्गनाङ्गनाःपा
दांगुल्याक्रमेणकर्तव्याः सवत्रभोगमंगु
लत्रिथांगुष्ठकस्मात्तः शेषाकिलोंगु
ल्यः क्रमेणपरिपाट्या अष्टाष्टेनाष्टांशेना
ङ्गुलाःकर्तव्याः प्रदेशिनृतोमध्यमाः अष्टां
शोनकार्याः अंगुष्ठस्योत्सेधउच्छ्रायस्तत्र
त्रभागमंगुलमङ्गःकथितः शेषांगुला
नामाष्टांशानामंगुष्ठप्रमाणात्प्रमाणोक्तं

यम ॥ अन्यदप्याह ॥ अंगुष्ठनखःकथितः
अन्तर्थभागेनमंगुलेतज्ज्ञैः शेषनखाना
मंगुलेक्रमात्किंचिद्धीनेवा ॥ तज्ज्ञैःप्रति।
मालक्षणज्ञैरंगुष्ठनखअन्तर्थभागेनम
ङ्गुलेकथितः शेषानामंगुलिनखानाम।
र्धांगुलप्रमाणे अथवाक्रमात्परिपाट्या
किंचिद्धीनेसर्वांगुलप्रमाणेकार्यं अथाश्ले
भाजायतइति अन्यदप्याह जंघाग्रपरि
णाहनअन्तर्दशोक्तविस्तारात्त्व मध्येत
समविपुलापरिणाहात्रिगुणितानाम ॥
जंघाग्रेजंघापर्यन्ते वत्तदशांगुलानिपरि
णाहतोक्तःकथितः विस्तारात्पंचांगुलानि
जंघामध्येमध्यभागेसप्तांगुलानिविपुला
निविस्तीर्णानिपरिणाहात्समस्त्रिगुणिताः ए
कविंशत्यंगुलानीत्यर्थः ॥ अन्यदप्याह
अष्टौतजानुमध्येवैपुल्येअष्टकान्तपरि
णाहः विपुलौवत्तदशोरुमध्येद्विगुणाअ
नन्तविधिः ॥ जानुमध्ये अष्टाअंगुलानिवै
पुल्यंपृथुत्वं अष्टकेवत्तविंशत्यंगुलानि।
परिणाहः ऊरुमध्येमध्यभागेवत्तदशांगु
लानिभवन्ति ॥ अन्यदप्याह कटिरष्टा
दशाविपुलाःवत्वारिंशाअन्तर्भोगअ वत्त
अत्वारिंशद्गुलानिनाभीवेधेन ॥ गं।
भीरत्वणप्रमाणेनवैपुल्येनवांगुलमेकं

जैवा।
टी।
४४५

भवति ॥ अन्यदप्याह ॥ चत्वारिंशद्विपु
ताना मौ मध्येन मध्यपरिणाहः स्तनयोः
षोडशवान्तरमर्धकल्पषडंगुलकेनाभौ ॥
मध्येन मध्यभागे परिणाहश्चत्वारिंशद्वि
युताद्वाचत्वारिंशदंगुलानि स्तनयोर्द्वयो
रन्तरे मध्ये षोडशांगुलानि स्तनयोरूर्ध्वं तिर्य
क्कृत्वा षडंगुलके षडंगुलप्रमाणे कल्प्य।
कार्ये ॥ अन्यदप्याह ॥ अष्टाविंशो द्वाद
शबाहू कार्यौ तथा प्रबाहव बाहवहिक्लो
णौ प्रतिबाहू षडंगुलवत्तुष्कम ॥ अंसौ स
स्कन्धौ ग्रीवा पार्श्वादेकान्तं यावदष्टांगु।
ले विस्तीर्णौ कार्यं अंससमीपवर्तिनौ बा।
हूषडंगुलानि दीर्घौ कार्यौ बाहुसमीपवर्ति
प्रतिबाहूतावेव द्वादशांगुलानि दीर्घौ बा
हूपञ्चांगुलानि विस्तीर्णौ प्रतिबाहू षडंगुल
वत्तुष्कं विस्तीर्णौ ॥ अन्यदप्याह ॥ षोड
शबाहुमूले परिणाहे द्वादशाग्रहस्तेच
विस्तरेणाकरतले षडंगुलेसमदैर्घेण ॥
बाहुमूले षोडशांगुलानि परिणाहः अग्र
हस्तेच प्रकोष्ठप्रदेशे द्वादशांगुलानि परि
णाहः करतले हस्ततले विस्तारेण षडंगु।
लं कार्यं दैर्घेणायामेन सप्तांगुलानि ॥
अन्यदप्याह ॥ पञ्चांगुलानि मध्या प्रदे
शिनी मध्यपर्वदलहीना अनयातुल्या

वानामिका कनिष्ठा तु पर्वोना अङ्गुष्ठादन
न्तरं याङ्गुली सा प्रदेशिनी तदनन्तरं म।
ध्यमा तदनन्तरं अनामिका तदनन्तरं
कनिष्ठिका मध्यामध्यमाङ्गुली पञ्चाङ्गु
लानि दीर्घा कार्या प्रदेशिनी मध्यमायाः
पर्वदलेन पर्वणोर्धेन हीना कार्या साधो
निवत्वायाङ्गुलानि हृद्रेखायाः प्रभृति द्वि
तीयरेखां यावत्पर्वोच्यते अनया प्रदेशि।
न्या तुल्या वानामिका कार्या तस्या अनामि
कायाः पर्वोना कनिष्ठिका कार्या ॥ अन्य
दप्याह ॥ पर्वद्वयमङ्गुष्ठश्च शेषाङ्गुल्यस्त्रि
भिःकार्यः नखपरिमाणं कार्यं सर्वासां प
र्वणोर्धेन ॥ अङ्गुष्ठः पर्वद्वये कार्यः शे
षाः परिशिष्ट अङ्गुल्यस्त्रिभिः पर्वभिः कार्यः
सर्वासामङ्गुलीनां पर्वणोर्धेन नखपरिमा
णं कार्यं एवमवयवलक्षणमभिधाया,
धुना स्वरूपप्रदर्शनार्थमाह ॥ देशानु
रूपभूषणवेशालंकारमूर्तिभिः कार्याः
प्रतिलक्षणयुक्ता संनिहिता वृद्धिदा भव
ति ॥ देशानुरूपैर्देशसदृशैर्भूषणैराभ
रणैर्हारकेयूरकटकादिभिर्वेषैः शालाले
कारैर्यस्मिन्देशे यादृशाः पुरुषाणां वेषाः
तादृशैर्मूर्तिभिर्देहैः स्थूलसन्मावयव
त्वेन देशानुरूपैरेव कार्याः यत्र प्रतिमावा

डोबा
राटी
५४७

447

लक्षणोःपार्श्वेयुक्ता सन्निहिता सर्वकाले
वृद्धिदा वकतर्ह ऋद्धिददाति ॥ तथा चक्र
पुष्पः ॥ द्वादशांगुलकं वक्त्रं ललाटं चतु
रंगुले नासाग्रीवा तु कर्तव्या तत्स्यां चैव त्र्य
माणतः पृष्ठान्तं ललाटस्य ज्ञेयमङ्गु
ले स्मृतः हनुद्वयं च चिबुकमंगुलादितये।
स्मृतम् चतुरंगुलकौ कर्णौ भ्रुवौ चैव तु।
थास्मृतौ तथा द्व्यंगुलकौ नेत्रे भ्रूमध्ये तु
त्प्रमाणतः कर्णनेत्रान्तरं कुर्यात्तत्सार्धं च
तुरंगुलम् अर्धांगुलमाने तु तदर्थे च
संस्मृते चतुरंगुलकं वक्त्रं नासाग्रे द्व्यंगुले
स्मृते नेत्रे द्व्यंगुलके दीर्घे तत्त्रिभागेन ता
रकाः हन्वान्तर पञ्चमांशेन सार्धिकांगुल।
संमिता द्व्यंगुलं वाली पृष्ठके तथा नासा
पुटौ स्मृतौ कर्णस्रोत्रेंगुलमिते क्रमात्
तथैव च गोञ्छार्धांगुलका कार्या तत्स्य।
माके पुष्करिका द्व्यंगुलौ तु स्मृतौ शंख
वायामौ चतुरंगुलौ चतुर्दशांगुलः ग्रीवो
द्वाविंशत्परिणाहतः एकत्रिंशत्स्मृता ग्री
वा विस्तारास्या दशांगुला कण्ठस्य हृदये।
नाभीमेढ्रान्तं द्वादशांगुले ऊरुजंघे चतुर्वि
शाङ्गानुनी चतुरंगुले द्वादशांगुलकौ पा
दौ विस्तारात्षडंगुलौ गुल्फादधोभागग
ते चतुरंगुलमुन्नते अंगुष्ठेङ्गुले दीर्घे च

के परिणाहतः शेषाः पादानुसारेण कर्तव्याः
शुभलक्षणाः अंगुष्ठेन स्वमानेस्यादर्धमं
गुलविस्तृते शेषाणामनुसारेण न स्वमा
ने प्रकल्पयेत् जंघाग्रे परिधिज्ञेयं ऽङ्गुलानि
च चतुर्दश ऊरुतद्द्विगुणौ प्रोक्तौ कटिस्त
त्रिगुलास्मृता अंगुलं तु भवेन्नाभी वेध।
गाम्भीर्ययोरपि नाभीमध्ये परीणाहश्च
त्वारिंशाधिकेयुताः षोडशस्तनयोर्मध्यं क
क्षाद्धर्वं षडंगुले अष्टांगुलौ स्मृतौ स्कन्धौ।
बाहू विंशीचतुर्युता बाहुमूले षोडशस्या।
हस्ताग्रे द्वादशस्मृता षडङ्गुले हस्तताले
समदैर्घ्येण च स्मृते पञ्चाङ्गुला भवेन्मध्या
तर्जन्यर्धांगुलोनिता अनामिका च तन्नूर्ध्वं
कनिष्ठाचांगुलेनिभा सरूपाला च कर्तव्या
द्विपर्वोंगुष्ठकः स्मृतः त्रिपर्वांगुलयः शेष
नखाः पर्वार्धनिस्मृताः देशवेशानुयाहृता।
सौम्यरूपा च कार्येत् सुरूपालक्षणोपे
ता प्रतिमा ऋद्धिदा भवेत् इति ॥ अधुना
प्रतिमाणां विशेषलक्षणमाह ॥ दशर
थतनयो रामो बलिश्चैव रोचनिश्चैतवि
ष्णो द्वादश हस्ताः शेषाः प्रवरसमस्तनपरि
माणा ॥ दशरथतनयो दशरथपुत्रो रा
मो वैरोचनिर्विरोचनपुत्रः बलिश्चते वि
ष्णोर्विंशत्यधिकमंगुलशतं कार्यमित्यर्थः

डोंवा॰
टी॰
४४८

448

षोडशाङ्गुल्याः प्रतिमा द्वादशाङ्गुल्या द्वादशाङ्ग।
हीनत्वेन प्रवरसमन्वयविमाणा भवति
विंशत्यधिकाद्यङ्गुलशताद्द्वादशाङ्गुलान्यपा
स्याधिके शतमङ्गुलानां प्रतिमा प्रधाना
भवति ततोपि द्वादशाङ्गुलमपास्य शेषावत्ये
गुलामध्यमा भवति ततोपि द्वादशाङ्गुलमपा
स्यवनवत्येगुलान्यूनपरिमाणा प्रतिमा
भवति चैवङ्गुलप्रमाणे द्वादशाविंशोणमा
यतेवसत्वमित्यनेन या प्रतिमोक्ता सा अ
गुलशतमष्टाधिकं भवति यदप्युक्तं दश
वक्त्रनतयोः तामो बलिरश्चैवोव निश्चितेविं
शामित्यस्मिन्द्वादशानामङ्गुलानामधिका
नां नैरधिकेन प्रमाणेन कार्यः सर्वावयवा।
नामेवं हीनत्वेप्यनुपानयवेत्यनुक्तेऽप्य
यति इति ॥ अथ तावद्भगवतो विष्णोः स्वरू
पकथनमाह ॥ कार्योष्टभुजो भगवांश्च
तुर्भुजो द्विभुज एव वा विष्णुः श्रीवत्साङ्कि
तवक्षाः कौस्तुभमणिभूषितोरस्कः ॥ अत।
सीकुसुमप्रख्यः पीताम्बरनिवसनः प्रस
न्नमुखः कुण्डलकिरीटधारी पीनगलोरः
स्थलांसभुजः खड्गगदाशरपाणिर्दक्षिण
तः शान्तिदश्चतुर्थकरः वामकरेषु कार्मु
कखेटकचक्राणि शंखश्च ॥ अथ चतुर्भु
जमिच्छति शान्तिद एकोगदाधरश्चान्यः।

दक्षिणपार्श्वेत्वेवं वामे शंखचक्रे च द्विभुजा
स्य तु कालिकेरो दक्षिणहस्ते पद्मशंख
धः। एवं विष्णोः प्रतिमा कर्तव्या भूतिमिच्छ
द्भिः कार्योष्टभुजो भगवान्विष्णुर्नारायणः।
अष्टभुजोष्टहस्तः कार्यः चतुर्भुजो द्विभुज ए
व वा कार्यः श्रीवत्साङ्कितवक्षाः श्रीवत्सेन
रोमावर्तेनाङ्कितं चिह्नितं वक्षो यस्य त
था कौस्तुभाख्येन मणिना भूषितमलंकृत
मुरो वक्षो यस्य अतसीकुसुमवदतसीपुष्प
वत्प्रभासः पीताम्बरनिवसनं परिधा
नं यस्य प्रसन्नमुखः सौम्यवदनः कुण्ड।
लेकर्णाभरणे किरीटं मुकुटं तद्धारणशी
लमस्य पीनः पीवरो गलः कण्ठो यस्य सो।
सल इत्यर्थः तथा पीनोरस्थलः पीनांसः
पीनस्कन्धः पीनभुजः पीनबाहुर्दक्षिणतो
दक्षिणभागे अष्टभुजस्य यश्च बाणापाण।
योर्हस्तान्तेष्वेकस्मिन्खड्गो नन्दकः द्वितीये
गदा कौमोदकी तृतीये चक्रे चतुर्थे शान्ति
दः इष्टाभिमुखः ऊर्ध्वांगुलिः शान्तिदायक
ः वामकरेषु वामहस्तेषु चकार्मुके धनुः
शंखं खेटके फलः चक्रं सुदर्शनं शंखश्च पा
ञ्चजन्यः अयं पाठो विकल्पः तथाष्टावि पो
पर्यायकः यदि चतुर्भुजं कर्तुमिच्छति त
दा दक्षिणपार्श्वे भुजद्वये एकः शान्तिदः को

गेवा·
टी·
४५४

449

द्विपोगदाधरः वामपार्श्वेभुजद्वये एक।
स्मिन्शंखं द्वितीयेचक्रं द्विभुजस्यतुविष्णो
र्दक्षिणहस्तः शान्तिदः अपरोवामःशंखध
रः एवमनेनप्रकारेणभूतिमिच्छद्भि
भूतिमभिलषद्भिर्विष्णोर्नारायणस्यप्र
तिमार्चाकर्तव्या ॥ अथहलधरस्यलक्ष
णमाह ॥ बलदेवोहलपाणिर्मदविभ्रम
लोचनश्चकर्तव्यः बिभ्रत्कुण्डलमेकंशं
खेन्दुमृणालगौरतनुः ॥ बलदेवोहलध
रोहलपाणिर्लांगलहस्तः मदविभ्रम।
लोचनः मदिरापानेनयोमदस्तेनविभ्र
मेणचलितलोचनेनयनेयस्यसतथाभूतः
कर्तव्यः एकंकुण्डलंकर्णाभरणंबिभ्रद्धार
यन् शंखेन्दुमृणालगौरतनुः शंखःप्रसि
द्धः इन्दुश्चन्द्रः मृणालोबिसं तद्वद्गौराश्वे
तातनुर्यस्यसतथाभूतः इति ॥ अथैका
नंशायालक्षणमाह ॥ एकानंशाका
र्यादेवीबलदेवकृष्णयोर्मध्ये कटिसंस्थि
तवामकरासरोजमितरेणचोद्वहती ॥
कार्याचतुर्भुजायावामकराभ्यांसपुस्तकं
कमलं द्वाभ्यांदक्षिणपार्श्वेवरमर्थिष्वक्ष
सूत्रंच वामेष्टाष्टभुजायाः कमण्डलुश्चापम्
बुजंशास्त्रं वरशरदर्पणयुक्ताःसव्यभुजासा
क्षसूत्राश्च ॥ एकानंशेतिबलदेवकृष्णयोः

हलधरवासुदेवयोर्मध्ये अन्तरेएकानंशाभि
धानादेवीदेवताकार्या विधेया कीदृशीकटि
संस्थितावामकरा कटिसंस्थितेवामकरेवा
महस्तेयस्याः इतरेणदक्षिणेनसरोजंपद्म
मुद्वहतीधारयन्तीकुर्यादिति अथचतुर्भुजा
क्रियते तदातस्यावामकरयोरेकस्मिन्पुस्त
कंद्वितीयेकमलं द्वाभ्यांदक्षिणेएकोहस्तो
वरदः वामेष्टाष्टभुजायाइति अथाष्टभुजा
क्रियते तदातस्यावामहस्तचतुष्के एकस्मि
न्कमण्डलुर्द्वितीयेचापंधनुस्तृतीयेअम्बुजंप
द्मं चतुर्थेशास्त्रंपुस्तकं सव्येदक्षिणभागेए
कोहस्तोवरदो द्वितीयेशरः तृतीयेदर्पणो
आदर्शो चतुर्थेअक्षसूत्रमिति ॥ अथसाम्ब
प्रद्युम्नयोर्लक्षणमाह ॥ साम्बश्चगदाह
स्तः प्रद्युम्नश्चापभृत्सुरूपश्च अनयोःस्त्रियौ
चकार्यैखेटकनिस्त्रिंशधारिण्यौ ॥ साम्ब
द्विभुजोगदाहस्तश्चकार्यः प्रद्युम्नोवासुदेव
श्चापभृद्धनुर्धरहस्तः सुरूपःशोभनरूपा
श्च अनयोर्द्वयोःसाम्बप्रद्युम्नयोःस्त्रियौका
र्यौ कीदृश्यौखेटकनिस्त्रिंशधारिण्यौ खे
टकःफरः निस्त्रिंशःखड्गः तौधारयन्त्यौ ॥
अथब्रह्मणःकुमारस्यचलक्षणमाह ॥ ब्रह्मा
कमण्डलुकरश्चतुर्मुखःपंकजासनस्थश्च
स्कन्दःकुमाररूपःशक्तिधरोबर्हिकेतुश्च ॥

डोवा
दाटी
४५०
450

ब्रह्मापितामहः कमण्डलुकरः कमण्डलुर्ह
स्तश्चतुर्मुखश्चतुर्वक्त्रः पंकजासनस्थश्च पं
कजासनेपद्मासनेस्थितः स्कन्दःकार्त्तिके
यः कुमाररूपोबालरूपः शक्तिमायुधवि
शेषंधारयन्बर्हिकेतुर्मयूरध्वजः ॥ अथे
न्द्रलक्षणमाह ॥ शक्रश्चतुर्विषाणद्वि
पोमहेन्द्रश्चवज्रपाणिनम् तिर्यक्ललाटसं
स्थतृतीयमपिलोचनंविभ्रम ॥ महेन्द्र
स्यद्विपोहस्ती ऐरावताख्यः शक्रः श्वेतव
र्णश्चतुर्विषाणश्चतुर्दन्तःसचकार्यः वज्रपा
णित्वे वज्रमायुधविशेषः कुलिशाख्यास्ते
पाणौयस्यसवज्रपाणिः तस्यभावोवज्र।
पाणित्वे तृतीयंलोचनंनेत्रंतिर्यग्ललाट
संस्थे तिर्यक्कृत्वाललाटेस्थितंविभ्रमपि
कार्यम ॥ अथभगवतोमहेश्वरस्यलक्ष
णमाह ॥ शम्भोःशिरसीन्दुकलावृष
ध्वजोक्षितृतीयमपिचोर्ध्वम् शूलंधनुःपि
नाकंवामार्धेवागिरिसुतार्धम ॥ शम्भोर्म
हेश्वरस्यशिरसिमूर्धनि इन्दुकलाचन्द्रक
लाकार्या वृषध्वजः वृषोदान्तस्सएवध
जश्चिह्नंयस्य ऊर्ध्वमूर्ध्वस्थितंतृतीयमपि
अक्षिनेत्रंकर्तव्यं शूलंत्रिशूलमेकस्मि
न्हस्ते धनुश्चापं तदेवपिनाकसंज्ञमन्य
स्मिन् गिरिसुतागौरीवामार्धेवाकार्या अ


र्धगौरीश्वरमित्यर्थः ॥ अथबुद्धलक्षण।
माह ॥ पद्माङ्कितकरचरणः प्रसन्नमूर्ति
सुनीचकेशश्च पद्मासनोपविष्टः पितेव
जगतोभवतिबुद्धः ॥ पद्माङ्कोकरचरणः
कार्यः करौहस्तौचरणौपादौपद्मेकमले
लाञ्छनाङ्कितौचिह्नितौकृताभिरेखाभिरि
त्यर्थः प्रसन्नमूर्तिःसौम्यदेहःप्रसादपरः
सुनीचकेशश्चसुनीचाअत्यल्पाकेशामूर्ध
जायस्य केचित्सुनीलकेशश्चेतिपठन्ति
सुनीलाअतिनियमिताः पद्मासनेकमला
सनेउपविष्टःस्थितः पितेवजगतःजगतो।
विश्वस्यपितेवजनकइववत्सलशीलइत्य
र्थः अथार्हतोदेवस्यलक्षणमाह ॥
आजानुलम्बबाहुःश्रीवत्साङ्कःप्रशान्तमूर्ति
श्च दिग्वासास्तरुणोरूपवांश्चकार्योऽर्हतांदे
वः ॥ अर्हतांदेवोजिनआजानुलम्बबाहुः
कार्यः जानुसमप्रमाणहस्तः श्रीवत्साङ्कः श्री
वत्समङ्केचिह्नंविशेषंयस्यसःप्रशान्तमूर्तिः
जितेन्द्रियोरागद्वेषरहितः दिग्वासाःनग्नः
तरुणोयौवनोपेतः रूपवान्शोभनवपुः
अथभगवतोभास्करस्यलक्षणमाह ॥
नासाललाटजङ्घोरुगण्डवक्षांसिचोन्न।
तानिरवेः कुर्यादुदीच्यवेषंगूढंपादादु
रोयावत् ॥ बिभ्राणःस्वकररुहेबाहुभ्यां।

त्यं

पंकजेन मुकुटधारी कुण्डलभूषितवदनः प्रल
म्बहारो विहंगयुतः कमलोदरद्युतिमुखः
कञ्चुकगुप्तः स्मितप्रसन्नमुखः रत्नोज्ज्व
लप्रभामण्डलस्तु कर्त्तुः शुभकरोऽर्कः ॥
नासाललाटेति रवेरादित्यस्य नासाना।
नासिकाललाटसृक्वाग्रं जंघः ऊरूगण्ड
मुखगण्डो वक्ष उरःप्रदेशः एतान्युन्नत
न्यानि उदीच्यवेषमुत्तरवेषो कुर्यात उत्त
रवेषमित्यर्थः पादाभ्यन्तरं वलोयाव
कुंठे बालकगुप्ते विधाण इति सकलदेहे
स्तनले बाहुभ्यां भुजाभ्यां पंकजे कमले बि।
भ्राणः मुकुटधारी मुकुटं मौलिं तेन धारय
ति कुण्डलभूषितवदनः कुण्डलाभ्यां क
र्णाभ्यां भूषितमलंकृतं वदनं मुखं यस्य प्र।
लम्बोऽतिदीर्घो हारो मुक्ताहारो यस्य विहंग
मावसनं तेन युतः संयुतः कमलपद्मेन।
स्योदरमध्यं तेन द्युतिकान्तिर्मुखवदने
यस्य कञ्चुकः प्रसिद्धस्तेन गुप्तः आच्छादि
तः स्मितं प्रहसितं प्रहसनं सौम्यमतिशो
भनं मुखं वक्त्रं यस्य रत्नैर्मणिविशेषैरुज्ज्व
लोऽतिदीप्यमानः प्रभामण्डलः कान्तिम
ण्डलो यस्य एवंविधोऽर्क आदित्यः कर्त्तुः शुभ
करः श्रेयःप्रदः ॥ अथार्चामुद्दिश्य सर्वप्र
तिमानां शुभाशुभमाह ॥ सौम्यानु हस्त

देवा॰
टी॰
४५१
451

मात्रावरदो हस्तद्वयोच्छ्रिता प्रतिमा दोषमु
भिदाय भवेत् त्रिचतुर्हस्तप्रमाणाय ॥ नृप
भयमंगायां हीनांगायामकल्पता कर्त्तुः
म कातोदर्यो तुद्भयर्थविनाशः कृशांगाया
म ॥ मरणं तु सक्षतायां शस्त्रनिपातेन
निर्दिशेत्कर्त्तुः वामावनतायां पत्नीं दक्षिणा।
विनताहिनस्त्यायुः ॥ नवनमूर्द्ध्वदृष्टा
करोति चिन्तामधोमुखी दृष्टिः सर्वप्रति।
मास्वेव शुभाशुभं भास्करोक्तसमम ॥
सौम्यान्तु हस्तमात्रेति हस्तमानाहस्तप्र।
माणादीर्घाप्रतिमा सौम्या शुभा भवति ह
स्तद्वयोच्छ्रिता धनधान्यप्रदा भवति त्रि
चतुर्हस्तप्रमाणमाय यथा सुभिक्षदोषमु।
भिदाय भवेत् त्रिहस्तादेमाय चतुर्हस्ता
सुभिक्षाय भवेत्स्यात् नृपभयमिति अ
धिकांगायामिति स्थूलावयवायां कर्त्तुः अक
ल्पता अनारोग्यं कातोदर्यो तन्नूदर्यो।
त्कृष्ट्ये भवति कृशांगायां दुर्बलावयवा
यामर्थविनाशो वित्तक्षयः सक्षतायांक्ष म
तयुक्तायां प्रतिमायां कर्त्तुः शस्त्रनिपातेन
मरणं निर्दिशेद्वदेत् वामेवामभागे अवन
तायां प्रतिमायां कर्त्तुः पत्नीं भार्यां हिनस्ति मार
यति दक्षिणाविनता आयुर्जीवितं हिन
स्तिमारयति आयुर्घातयंकरोति नवन



मर्धहस्ताप्रतिमानेत्रनाशंकरोति अधो
मुखी हि शिरोनाशं करोति एवं भाक्त
तोऽर्द्धमेतद्यत्कथितं तस्य शुभाशुभं स
र्वं प्रतिमासु ह्येयं ज्ञातव्यम् ॥ अधुना
लिंगस्य लक्षणमाह ॥ लिंगस्य हस्तपरि
धिं दैर्घ्येण तत्त्रिधा विभजेत् मूले
तु चतुरस्रं मध्ये त्वष्टाश्रि वृत्तमग्रतः ॥ वृत
चतुरस्रमवनितो नमध्यं कार्यं तत्पीठिकाग्र
ध्ये हस्तोच्छ्रायेण मूर्द्धमस्तकतः पीठिकोर्ध्व
मुच्च भावः ॥ लिंगस्य हस्तभागोयः परिधि
परिणाहं तं सूत्रेण परिछिद्य तत्सूत्र
स्य दैर्घ्येण दीर्घेण तावत्प्रमाणं तेन प्र
माणेन त्याषाणं काष्ठमयीं वा कृत्वा त्रि
धा विभजेद् भागत्रयेण कुर्यात् ततो लिंगस्य
मूले यो सो त्रिभागस्तेन चतुरस्रं कार्यं म
ध्ये यस्तमष्टाश्रि कार्यं अतः पर्यन्ती
यभागस्तेन वृत्तं परिवर्तुलं कुर्यात् तत्र च
तुरस्रं यद्भागं तदेव निखाते भूखाते का
र्यं तेभ्यो मध्ये यदष्टाश्रि तत्पीठिकाश
ध्ये पीठगर्त्ते क्षिपेत् एवं पीठविवरात्
मस्तकतः सर्वांस्त्रिदश पीठिकापर्यन्ते पी
ठिका हस्तोच्छ्रायेण सदा कार्या हस्तमा
त्रस्य परिवर्तुलस्य लम्भायतोच्छ्रायत्व
त्वा एतदुक्तं भवति यावत्प्रमाणे वृ

त्तभागस्य दैर्घ्यं तावत्प्रमाणं मस्तकतः पी
ठिकाहस्तं कार्यमिति ॥ अन्यद्विशेषमाह
लक्षणमाह ॥ लतादीर्घं देशाद्ग्रं पार्श्व ।
विहीनं पुरस्य नाशाय यस्य तत्र भवेन्म
स्तके विनाशाय तल्लिंगम् ॥ यल्लिंगम
ते ऊर्ध्वं लेदीर्घं मस्तकछिन्नं तद्देशाद्देशो ह
न्ति यत्पार्श्वाभ्यां विहीनो तत्पुरस्य तत्पु
रस्य नाशाय भवति यस्य मस्तके मूर्ध
स्तते छिद्रं भवेत्तस्मात्तल्लिंगं विनाशाय भ
र्त्तुरेव भवति ॥ अथ मातृगणपतीनां
लक्षणमाह ॥ मातृगणाः कर्तव्यास्तन्ना
मदेवानुरूपकेन चिह्नैः कर्तव्याः तन्ना
मनामाथे देवास्तदनुरूपं ताह शोभनं चि
ह्नं लक्षणं यस्य तथा ब्रह्माणीयलिंगे ब्र
ह्माकमण्डलकात्सु चतुर्भुजा मकरासन
स्थितिब्रह्माकार्या कार्या चतुर्भुजा भवा
नीति वैष्णव्याः शम्भोश्च शिरसीन्दुकौ
लेति ऐन्द्र्याः स्कन्दः कुमाररूपः शक्तिकौ
मार्यैः शंखचक्रगदाधारिणी ? महेन्द्र
स्य वज्रपाणित्वमित्यैन्द्र्याः दण्डीयमो म
हिषगोः इति याम्याः हेमारूढः पाशह
स्तः वरुणः इति वारुणाः नरवाहनः कुबे
र इति कौबेर्याः एवमन्यासां नार्थं सेहि
वाराहिवैनायकी नामपत्ये किलतासां

शैवा०
टी०
५५३

लक्षणो भामस्यलोमतानितासंवेषु स्यकर्तव्यो
येनप्रकारेणलक्षीरूपस्य शोभा जायत इति
रेवन्तोकर्तव्यो श्वारूढःकार्यः अश्विनौ
चाश्वारूढौलङ्घोपरिस्थित इत्यर्थः तथा
मृगयामृगवधमृगक्रीडादिपरिवार इति।
यः परिवारस्तस्मृगयायुक्तः आदिग्रहणा
दश्ववाहनेनतस्यरीलाणोनदवेघामादेव
अश्वयमवरुणाकुवेराणांलक्षणमाह ॥
दण्डीयमोमहिषगोहेमारूढश्चपाशभृद्व
रुणः नरवाहनःकुवेरोवामकिरीटीकह।
लोनिः ॥ यमःप्रेताधिपतिर्दण्डी दण्डह
स्तोमहिषारूढःकार्यः वरुणोपांपतिः
हेमारूढः हेमःपक्षीतस्मिन्नारूढस्त।
स्योपरिस्थितः पाशभृत्पाशहस्तःकार्यः।
कुवेरोवैश्रवणोनरवाहनो मनुष्यारूढः
नरवाहनइतिकेचित्पठन्ति वामकिरीटी
वामभागेकिरीटीयस्यहस्तादिविलोलि
कुन्दिःकार्यः अत्रप्रतिमालक्षणेदेवतानांदे
वतानांवायलक्षणं आचार्यैरुक्तं तेषां।
लोकप्रसिद्धयायाशरीरशोभाभवति त
थानयोक्तवप्रतिमाकार्यालक्षणेऽस्मिंस्तु
लप्रमाणोइत्यादि यदुक्तं तत्सर्वंकार्यमत्र
तुलोकतोऽपिदृष्ट्वाकार्यमिति ॥ तथावक
ष्यपः ॥ एकदंष्ट्रोगजमुखश्चतुर्बाहुर्वि।

भुजः

नायकः लम्बोदरःस्थूलदेहोनेत्रत्रयविभूषि
तः ब्रह्माचतुर्वक्त्रोदण्डीकृष्णाजिनकमण्डली
विष्णुश्चतुर्भुजःशार्ङ्गीशंखचक्रगदाधरः श्री
वत्सांकःपीतवासावनमालाविभूषितः उ
ज्ञादितमुखःखर्वीवक्रिकान्तिर्द्विभुजः वरा
हःसूकरमुखःचतुर्बाहुर्विभूषितः नीलांजन
चयःप्रख्योध्यानासक्तःसुलोचनः ईश्वरोज
टिलश्चन्द्रशेखरचन्द्रार्कभूषणः उरगोपवी
तीवृषनिवासःपिनाकभृत चण्डिकाष्टदश
भुजासर्वप्रहरणान्विता मत्तासिंहरथाध
यासमहिषासुरसूदिनी मयूरवाहनस्कन्दः
शक्तिकुक्कुटधारकः सरूपदेहोविक्रान्तोदेवः
सेनापतिःशिशुः आदित्यलक्षणःखर्वीकव
चीखड्गधृतया तेजसांकेकणकरःषट्चक्र।
श्वकिरीटवान् ऐरावणश्चतुर्दन्तःश्वेतदन्तो
महागजः तदारूढोसहस्राक्षवज्रहस्तोमहा
बलः तिर्यग्ललाटगेनेत्रेतृतीयेतस्यकार्येन
नीललोहितवर्णश्चप्राचीनस्यसमीपगः
एवंदेवगणाःसर्वेसायुधाभरणोज्वलाः क
र्तव्याःस्वस्वपार्श्वेषुप्राणाःशुभलक्षणाः हल
मालामवेत्सौम्यादिहस्तात्तुधनप्रदाः शुभि
लंदेसवाप्नुयात्रिहस्ताथचतुष्कः वैकल्पं।
कृतेहीनाकृशांगीदेहनाशिनी सवणम
लनोयोघरदीर्घाविघ्ननाशिनी वामेनताह

ॐवा
राटी
४५४
454

हस्तिपत्तीकर्त्तर्द्दितिमाभावयं अर्धंहस्तिनै
यरोगंगोकण्णाद्योभग्नो सहपास्त्र
भोवैवसर्वांभवणम्भूषिता स्मायुधैश्चतमा
युक्ताकर्तव्याप्रतिमाशुभेति ॥ इतिश्री
महोत्पलविरचितायांमेविनाविवृतौप्रति
मालक्षणंनामाध्यायश्चतुःपञ्चाशः ॥
ॐनमस्सूर्याय ॥ अथवनसंप्रवेशोनामा
ध्यायोव्याख्यायते तत्रादावेवविधानमाह
कृत्वरनुकूलेदिवसेदैवज्ञविशोधितेशुभ
निमित्ते मंगलशकुनैःप्रस्थानिकैश्चवनसं
प्रवेशःस्यात ॥ कर्तुःप्रतिमाकर्त्तुरनुकूल
दिवसउपयकर्त्तुर्गृहस्पदिनेनिरुपहतेन
दैवज्ञविदैवज्ञेनकालविधायशुविशोधिते
दत्तेशुभनिमित्तेशकुनमुहूर्तादिकेवतस्मि
न्शुभनिमित्तेप्रस्थानिकैर्मंगलशकुनैः प्र
स्थानिकाः प्रस्थानेयात्रायांयानिमंगलश
कुनानिउक्तानितैः सिद्धार्थकादधिपयो
जनानीत्यादिकानि मंगलानिश्रेष्ठेहयमि
तेप्राव्यामित्यादिकाःशकुनाः एतैःप्रास्था
निकमंगलशकुनैर्वनसंप्रवेशःस्याद्भवे
त् वनेहस्तवकूलेदेशेप्रदेशः प्रतिमाका
ष्ठेकार्यइति ॥ तत्रचवर्जनीयान्दर्शना
ह ॥ पितृवनमार्गसुरालयवाल्मीकोया
नतापसाश्रमजाः चैत्यसरित्संगमसंभवा

श्चघटतोयसिक्ताश्च कुब्जानुजातवल्लीनि
पीडितावज्रमारुतोपहताः स्वपतितहस्ति
निपीडितशुष्काग्निप्लुष्टमधुनिलयाः तर
वोवर्जयितव्याःशुभदास्युःस्निग्धपत्रकुसु
मफलाः अभिमतवृक्षंगत्वाकुर्यात्सङ्गोम
बलिपूजाम ॥ एवंविधास्तरवोहस्तावे
जयितव्याः परिहर्तव्याः कीदृशाः पितृव
नेश्मशानेतत्रयेजाताः मार्गेःपथ्याःसुरा
लयंदेवगृहे वाल्मीकोवाल्मीककृतोत्कृ
पः उद्यानमुपवनं तापसाश्रमस्तपोवने
